प्रवेशाङ्कः

देवप्रयागस्थ-श्रीरघुनाथकीर्तिपरिसरस्य त्रैमासिकी वार्तापत्रिका

# रघुनाथवार्तावली



प्रथमवर्षम् ( २०१६ ) १-२ अङ्कौ जुलाई-सितम्बर, अक्टूबर-दिसम्बर २०१६

रघुनाथवार्तावली कृपया श्रीरघुनाथस्य प्रसरेत्।
दिशि दिशि प्रापयेदथ वार्ताः परिसरस्याभिनवाः।।

**प्रधानसम्पादकः**
प्रो. के.बी. सुब्बरायुडुः
( प्राचार्यः )

**परामर्शदातृमण्डलम्**
प्रो. बनमालीबिश्वालः
डा. प्रफुल्लगडपालः

**सम्पादकाः**
डा. शैलेन्द्रनारायणकोटियालः
डा. मनीषजुगरानः
श्री श्रीओमशर्मा

'रघुनाथवार्तावली'-सम्बद्धमभिप्रायम्, प्रकाशनयोग्याः कार्यक्रमवार्ताः च अधोलिखित-ई.मेल् सङ्केतेन प्रेषयन्तु-
srkvarta@gmail.com

परिसरस्य जालपुटेऽपि रघुनाथवार्तावली द्रष्टुं शक्यते-
website : www.srkcampus.org

देवप्रयागस्थ-श्रीरघुनाथकीर्तिपरिसरस्य त्रैमासिकी वार्तापत्रिका

# रघुनाथवार्तावली

प्रकाशकः
राष्ट्रियसंस्कृतसंस्थानम्
श्रीरघुनाथकीर्तिपरिसरः
देवप्रयागः, पौडी-गढवालः
(उत्तराखण्डः)-249 301
(दूरभाषः - 01378-266028)
email : srkcampus@gmail.com
website : www.srkcampus.org

## शुभाशंसा

देवभूमौ देवप्रयागे राष्ट्रियसंस्कृतसंस्थानस्य परिसरेषु अन्यतमः श्रीरघुनाथकीर्तिपरिसरो विलसति। परिसरकार्यपरिचायिका त्रैमासिकी वार्तावली प्रकाश्यते इति प्रवृत्तिः सन्तोषं जनयति। अलकनन्दा-भागीरथ्योः सङ्गमजलं परिसरं सततं धुनोति। तपोभूमिरियं वेदशास्त्रसंरक्षणाय कल्पेत। अध्ययनार्थं छात्राः अहमहमिकया समागच्छेयुः च।

“**प्रेता जयता नरः**” इति अथर्ववाणीं स्मरन्तः अग्रेसरामः।

ज्ञानगङ्गा देवप्रयागपरिसरतः प्रसरतु इत्याशयेन सह–

भावत्कः
(परमेश्वरनारायणशास्त्री)
कुलपतिः, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

## पुरोवाक्

श्रीरघुनाथसनाथितेऽस्मिन् उत्तराखण्डस्य पुण्यनगरे देवप्रयागे विलसत्ययं नूतनोऽभिरामश्च श्रीरघुनाथकीर्तिपरिसरः। राष्ट्रियसंस्कृतसंस्थानस्यास्मिन् परिसरे सन्निकट एव भागीरथ्यलकनन्दयोः सङ्गमलहर्य्यः “**सङ्गच्छध्वं संवदध्वम्**” इति गायन्त्यः सहसैव कर्षन्ति समेषां मनांसि। चिरात् संस्थानस्य प्रतिष्ठां काङ्क्षन्तः पार्वत्यजनाः १६.०६.२०१६ तमे दिनाङ्के अस्योद्घाटनात् समीहितार्थाः सन्तः हर्षाह्लादम् अन्वभवन्। इदानीमेषः परिसरः षण्मासाभ्यन्तर एव सर्वेषां साहाय्येन शैक्षिकेष्वन्येषु च गतिविधिषु यथापेक्षितोऽनुदिनं सङ्गच्छतीति प्रतीयते। परिसरे साहित्य-व्याकरण-वेद-ज्योतिष-न्यायविभागैः सह इतिहास-हिन्दी-अङ्ग्रेजी-सङ्गणकविज्ञान (कम्प्यूटरसाइन्स)-शारीरिकशिक्षादीनाम् आधुनिक-विषयाणाम् अध्ययनाध्यापनकार्यं सम्यक्तया प्रचाल्यते। ग्रामाद्-ग्रामान्तरादत्र छात्राः अध्येतुम् आयान्ति। समीपवर्तिक्षेत्रस्थाः ग्राम-नगरवास्तव्याः संस्थानं प्रशंसन्तः आसन्नभविष्ये तदीयच्छात्राणां कृते एतत् महदुपकारकं सेत्स्यतीति अनुभवन्ति।

पारम्परिकशास्त्रीय-विषयैः समं परिसरे छात्रेभ्यः प्रतिदिनं कम्प्यूटर-आङ्ग्लभाषा-संस्कृतभाषाप्रशिक्षणादिकञ्च प्रदीयते। समेषां प्राध्यापकविदुषां वैदुष्यं प्रसारयितुं संस्कृतभाषायाः अभ्युन्नत्यै च इदानीम् अस्मात् परिसरात् नैकाः पत्रिकाः प्रकाश्यन्ते। एतासु “देवभूमिसौरभम्” इति नाम्नी अन्ताराष्ट्रिया वार्षिकशोधपत्रिका शीघ्रमेव संस्कृतजगति विबुधानन्दास्पदं प्राप्स्यति। अस्यां हि भारतीयानां वैदेशिकानाञ्च विद्यावतां शोधसुधोपेतान् उत्कृष्टतमालेखान् द्रक्ष्यन्ति विद्यानुरागिणः। “संस्कृतगङ्गा”-नाम्नी काचित् परिसरीया वार्षिकशोधपत्रिका अचिरात् परिसरात् प्रकाशयिष्यते, यस्याम् अध्यापकानां छात्राणां च शोधलेखाः भविष्यन्ति। अपरा च “रघुनाथकीर्तिपताका” इत्यभिधाना वार्षिक-परिसरपत्रिकाऽपि स्वीये साहित्यकलेवरे अत्रत्यानां संख्यावतां प्राध्यापकानां शोधच्छात्राणाञ्च चितान् लेखान् सङ्कलय्य पाठकानां समक्षं प्रस्तोष्यति, अत्र परिसरीयकार्यकपानां कार्याणां च उल्लेखोऽपि भविष्यति। इयञ्च “रघुनाथवार्तावली” परिसरस्य त्रैमासिकी वार्तापत्रिका संयुक्त-प्रवेशाङ्करूपेण इदानीम् अस्त्येव समर्पिता तत्रभवतां समेषां संस्कृतानुरागिणां करकमलेषु।

के.बी. सुब्बरायुडुः
(प्राचार्यः)
श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः (उत्तराखण्डः)

# सम्पादकीयम्

उत्तराखण्डप्रदेशस्य सुरम्ये देवभूमिहिमालयक्षेत्रे देवप्रयागनगरे राष्ट्रियसंस्कृतसंस्थानस्य नवीनपरिसर: २०१६-१७ तमे शैक्षिकसत्रे समुद्घाटित: इति आह्लादविषय:। अस्य परिसरस्य "श्रीरघुनाथकीर्तिपरिसर:" इति मङ्गलाभिधानं वर्तते। यद्यपि देवभूमिनाम्नि पुराणविख्यातेऽस्मिन् उत्तराखण्डराज्ये देवभाषाया: देवोपमव्यवहारस्य च प्राचुर्यं प्राक्कालादेव वर्तते। विश्रुतं हि महर्षिबादरायणस्य सरस्वतीसरित्तटवर्तिनी "व्यासगुहा" अत्रत्या यत्र किल श्रुतीनां विभाग:, पुराणानां प्रणयनं स्मृति-ब्रह्मसूत्र-महाभारतादीनाञ्च महद्वाङ्मयस्य रचनां भगवान् वेदव्यासश्चकार।

अस्य प्रदेशस्य सर्वकारेणापि द्वितीयराजभाषारूपेण संस्कृतभाषां समुद्घोष्य अस्या: सम्मानं महत्त्वञ्च विज्ञाय राष्ट्रस्य चिरं गौरवं वर्धितमिति श्लाघ्यतमम्। पुनश्चात्र देवप्रयागे १०८ वर्षेभ्य आरभ्य सततदेवभाषाध्ययने प्रथितगौरवालयमिव श्रीरघुनाथकीर्ति-आदर्शसंस्कृतमहाविद्यालय: स्वकीयं सुविस्तृतभूपटलं भवनं च संस्थानाय समर्प्य दिदृक्षते। तस्य यश: स्वरूपं अचिरमेव प्रकाशमायास्यति। उत्तराखण्डस्य प्रधानतम: गङ्गासङ्गमनाम्ना सुप्रसिद्ध: प्रथमप्रयागश्चात्र विलसति इति नैकानि हृद्यानि तत्त्वभूतानि कारणानि सन्ति संस्थानस्य स्थापनार्थं देवप्रयागनगरे। एतत् संस्थानम् उत्तराखण्डस्य गङ्गायमुनयोर्मध्ये यद्वा भागीरथ्यलकन्दयोर्मध्ये सारस्वतं पय: प्रवाहयिष्यति इति प्रतीयते। पर्वतीया: जना: अस्य संस्थानस्य ज्ञानधारया कृतकृत्या: भविष्यन्ति।

परिसरस्यास्य प्रगत्यै नैरन्तर्येण प्रयत्नरता: प्राचार्या: प्रो. के.बी. सुब्बरायुडुवर्या: अहर्निशम् एतस्य भवननिर्माणसम्बन्धिनी:, विविध-छात्रोपयोगिस्पर्धासम्बन्धिनी: शैक्षिकीश्च योजना: सफलीकर्तुं प्रयतन्ते। एतस्य नूतनपरिसरस्य सर्वाङ्गीणविकासाय अस्मत्कुलपतय: प्रो. पी.एन. शास्त्रिमहोदया: नैकवारं देवप्रयागमागत्य नैपुण्येन निरीक्षन्ते सर्वविधं कार्यजातम्। परिसरनिर्माणेऽपि कुलपतीनां क्रियाशीलत्वम् अवलोक्यते। तच्च एतेषां सहानुभूतिमभिव्यनक्ति। केन्द्रसर्वकारस्य मानवसंसाधनविकासमन्त्रालयोऽपि परिसरस्यास्य स्थापनार्थं यथेष्टं साहाय्यं वितरति। उत्तराखण्डसर्वकारश्च एतदर्थं भूमिं प्रादात्। श्रीरघुनाथकीर्ति-आदर्श-संस्कृतमहाविद्यालस्य प्रबन्धसमितिश्च परिसरस्य स्थापनां कामयमाना भूमिभवनादीन् समर्प्य महद्योगदानं दत्तवती। सर्वेषां विद्यानुरागिणां सौमनस्येन शिवसङ्कल्पेनायं परिसर: सञ्चाल्यते। केन्द्रीयलोकनिर्माणविभागस्य माध्यमेन परिसरभवनानि शीघ्रमेव निर्मास्यन्ते।

प्राचार्यमहोदयानामनुमोदनेन भूयिष्ठां प्रतिष्ठामवाप्तुं परिसरस्य विभागीयानां राष्ट्रियाणाम् अन्ताराष्ट्रियाणां च पत्रिकाणां प्रकाशनम् अचिरादेव जायमानमस्ति। अध्ययने न स्यात्कोऽप्यवरोध: इति चिन्तयित्वा परिसरेऽस्मिन् सर्वेष्वेव विभागेषु सुयोग्यप्राध्यापकानां व्यवस्था कृताऽस्ति। छात्राणां सर्वविधसमुन्नत्यै समये-समये विविधा: क्रीडा: अन्या: स्पर्धाश्च आयोज्यन्ते। गतनवम्बरमासे अन्त:परिसरीययुवमहोत्सवेऽस्य परिसरस्य ३८ छात्रा: अगरतलास्थ-एकलव्यपरिसरं गतवन्त:, तेष्वेक: छात्र: धावनस्पर्धायां कांस्यपदकं लब्धवान्। तत्र छात्रगणस्य सौजन्यशीलताया: सर्वत्रैव प्रशंसा कीर्तिताऽभूत्।

एतादृशीनां वार्तानां प्रसाराय परिसरीयेयं पत्रिका प्राकाश्यम् आनीयते। पत्रिकेयं परिसरस्य बहिरन्तरङ्गानां गतिविधीनां कार्यक्रमाणाञ्च सम्यङ्निबन्धनं विधाय वार्तावलीरूपेण निरन्तरं प्रकाशम् आयास्यति। वार्तातिरिक्तमत्र छात्र-प्राध्यापकानां सर्जनात्मका: लघुरचना: साहित्यखण्डे प्रकाशिता: सन्ति। अनेन सुधिय: पाठका लाभान्विता: भविष्यन्तीति आशास्महे। अस्या: पत्रिकाया: एष: प्रथम-द्वितीयाङ्कयो: संयुक्ताङ्क: एकस्मिन्नेव कलेवरे समुपनिबद्ध: अस्ति। आगामिनि काले यथा समयमेषा प्रति त्रिमासं देवप्रयागाद् गङ्गैव निर्गमिष्यति।

रघुनाथवार्तावलीयं **"मित्रस्य चक्षुषा समीक्षामहे"** इति नूतनस्य श्रीरघुनाथकीर्तिपरिसरस्य सन्देशं नयन्ती प्रथमं सोपानमारोहति। अस्या: सतताभ्युदयाय विनिवेद्यन्ते सत्परामर्शपुरस्सरा: बुधा: सुधाश्रिताश्च। वयं जानीमहे यदस्मिन् संयुक्ताङ्कविशिष्टे प्रवेशाङ्के सन्ति बह्व्य: सीमान: सम्भावनाश्च। किन्तु सुधिय: सज्जना: ताश्च अविगणय्य एतस्या: पत्रिकाया: गुणात्मकाभ्युदयाय तटस्थपरामर्शान् प्रदाय अवश्यं प्रोत्साहयिष्यन्तीति न केवलमाशास्महे किन्तु विश्वसिम:।

-सम्पादका:

## समुद्घाटितः उत्तराखण्डे नूतनपरिसरः



सरस्वतीसमर्चनं कुर्वन्तः कुलपतिप्रमुखाः परिसरसदस्याः छात्राश्च

श्रीरघुनाथकीर्तिपरिसरस्य उद्घाटनं १६.०६.२०१६ तमे दिनाङ्के परिसरीयभूखण्डे महत्समारोहपुरस्सरं सञ्जातम्। अस्मिन् शुभावसरे उत्तराखण्डराज्यस्य शिक्षामन्त्री श्रीमन्त्रीप्रसादनैथानी मुख्यातिथित्वेन समागतः। विशिष्टातिथित्वेन निवर्तमान-राज्यसभासांसदः श्रीमनोहरकान्तध्यानी, सारस्वतातिथिरूपेण च उत्तराखण्डसर्वकारस्य सूचना-आयुक्तः श्रीराजेन्द्रप्रसादकोटियालश्च समागतौ आस्ताम्। गरिमामयोऽयं समारोहो राष्ट्रियसंस्कृतसंस्थानस्य कुलपतेः प्रो. परमेश्वरनारायणशास्त्रिणः आध्यक्ष्ये सम्पन्नः। परिसरप्राचार्यः प्रो. सर्वनारायणझामहोदयः मङ्गलमयेऽस्मिन्नवसरे सर्वेभ्यः समागतेभ्यः जनेभ्यः हार्दं वाक्यपुष्पोपहारं समर्पितवान्।




कार्यक्रमे उपस्थितानां नागरिकाणामेकं दृश्यम्

संस्थानस्य समुद्घाटनावसरे मान्यैः वक्तृभिः स्वकीयाः प्रासङ्गिकविचाराः समुपस्थापिताः। शिक्षामन्त्रिमहोदयः अवसरेऽस्मिन् अकथयत् यदेषः परिसरः उत्तराखण्डस्य परिचयात्मकः सन् ख्यातिं प्राप्स्यति। अस्य स्थापनार्थं श्रीरघुनाथकीर्तिमहाविद्यालयस्य प्रबन्ध-समितिद्वारा अद्भुतप्रयासः कृतोऽस्ति। महाविद्यालयस्य प्राचार्येण डा. शैलेन्द्रनारायण-कोटियालेन तथा च अन्यैः देवप्रयागक्षेत्रवास्तव्यैः सततसाहाय्यं प्रदत्तम्। पूर्वराज्यसभासांसदः श्रीमनोहरकान्तध्यानी उक्तवान् यद् देवप्रयागस्य ऋषिकल्पाः समाजोद्धारकाः जनाः बहुकालात् पूर्वमेव शिक्षायाः महत्त्वम् अन्वभवन्। तस्माद्धि ते सार्धशतवर्षाणि पूर्वमेव विश्वविद्यालयस्य कृते कृतसङ्कल्पाः आसन्निति अभिलेखेषु द्रष्टुं शक्यते। सूचनाआयुक्त श्रीराजेन्द्रप्रसादकोटियालः परिसरस्य स्थापनया देवप्रयागस्य बहुविधविकासविषये यथौचित्यमवदत्। महाविद्यालयस्य प्रबन्धकः श्रीकृष्णकान्तकोटियालः सगद्गदम् उक्तवान् यद् "न्यासरूपमहाविद्यालयः संस्थानाय अर्पयामीति सर्वेषाम् उत्तराखण्डवासिनाम् उन्नत्यै भवत्विति मे मनीषा। अस्माकं प्रबन्धसमितिसदस्याः मया सह यथेष्टं साहाय्यं कृतवन्तः इति सर्वैः अतिथिभिः सह तेषामपि धन्यवादं व्याहरामि" इति। संस्थानस्य कुलपतिः प्रो. पी.एन. शास्त्री अवदत् यदेषः पुण्यनदीसङ्गममनोहरः श्रीरघुनाथसनाथितभूप्रदेशः वर्तते। भवतां सर्वेषां सत्प्रयासैः भगवत्कृपया च परिसरोऽयं समुद्घाट्यते। अस्य स्थापनार्थं केन्द्रसर्वकारेण उत्तराखण्डसर्वकारेण च महद्योगदानं विहितम्। इदानीमेषः त्रयोदशतमपरिसरः केन्द्रसर्वकारेण अङ्गीकृतोऽस्ति। अस्य निर्माणाय, समुन्नत्यै च भारतसर्वकारस्य मानवसंसाधन-विकासमन्त्रालयेन स्वकीयं समुचितसाहाय्यं प्रदातुम् आश्वासनं प्रदत्तमस्ति। शीघ्रमेव परिसरोऽयं स्वकीयेन वैलक्षण्येन शिक्षाप्रसारकार्येण प्रसिद्धिमेष्यतीति न संशयः।



उद्घाटनकार्यक्रमे भाषमाणः कुलपतिः प्रो. पी.एन. शास्त्री



कार्यक्रमावसरे भाषमाणः श्रीमन्त्रीप्रसादनैथानी



पत्रकारवार्तायां भाषमाणौ श्रीमन्त्रीप्रसादनैथानी पी.एन. शास्त्री च

अस्मिन् समारोहे देवप्रयागक्षेत्रस्य सहस्राधिकाः जनाः समुपस्थिताः आसन्। जनपदस्य अधिकारिणोऽपि भागं गृहीतवन्तः। एतेषु श्रीप्यारेलालमहोदयः (उपजिलाधिकारी), श्रीउनियालमहोदयः (गढवालमण्डलस्य सहायकशिक्षानिदेशकः), श्रीरावतमहोदयः (मुख्यशिक्षाधिकारी), श्रीमती शुभाङ्गी कोटियाल (नगर-पञ्चायत-अध्यक्षा), डा. शैलेन्द्रनारायणकोटियालः (श्रीरघुनाथकीर्ति-आदर्शसंस्कृतमहाविद्यालयस्य प्राचार्यः), महाविद्यालयीयः प्राध्यापकः डा. सुशीलप्रसादः, पूर्वप्रध्यापकः श्रीसुभाषचन्द्रटोडरिया च प्रमुखाः आसन्।

हर्षोल्लासपुरस्सरं पर्वतीय-'ढोल-दमाऊ'-वाद्यघोषेण, मिष्टान्नवितरणेन सह च अस्य उद्घाटनोत्सवस्य सम्पूर्तिः सञ्जाता। "शुभानि वर्द्धन्तां, जयतु संस्कृतं, जयतु भारत"मिति उद्घोषैः उच्चैः शब्दितेयं पुण्यनगरी।

# राजपत्रित-अवकाश-सूची

| अवकाशः | दिनाङ्कः | भारतीयतिथिः | वासरः |
|---|---|---|---|
| गणतन्त्र-दिवसः | २६ जनवरी | माघ ०६ | गुरुवासरः |
| महाशिवरात्रिः | २४ फरवरी | फाल्गुन ०५ | शुक्रवासरः |
| होली | १३ मार्च | फाल्गुन २२ | सोमवासरः |
| रामनवमी | ०४ अप्रैल | चैत्र १४ | मङ्गलवासरः |
| महावीरजयन्ती | ०९ अप्रैल | चैत्र १९ | रविवासरः |
| गुड फ्राईडे | १४ अप्रैल | चैत्र २४ | शुक्रवासरः |
| बुद्धपूर्णिमा | १० मई | वैशाख २० | बुधवासरः |
| ईद उल फितर | २६ जून | आषाढ ०५ | सोमवासरः |
| स्वतन्त्रता-दिवसः | १५ अगस्त | श्रावण २४ | मङ्गलवासरः |
| ईद उल जूहा ( बकरीद ) | ०२ सितम्बर | भाद्रपद ११ | शनिवासरः |
| दशहरा | ३० सितम्बर | आश्विन ०८ | शनिवासरः |
| मुहर्रम | ०१ अक्टूबर | आश्विन ०९ | रविवासरः |
| गाँधीजयन्ती | ०२ अक्टूबर | आश्विन १० | सोमवासरः |
| दीपावली | १९ अक्टूबर | आश्विन २८ | गुरुवासरः |
| गुरुनानकजयन्ती | ०४ नवम्बर | कार्तिक १३ | शनिवासरः |
| मैद-उन-नबी ( ईद-ए-मिलाद ) | ०२ दिसम्बर | मार्गशीर्ष ११ | शनिवासरः |
| क्रिसमस | २५ दिसम्बर | पौष ०४ | सोमवासरः |

# हिमाद्रौ बदरिकारण्यम्

डॉ. शैलेन्द्रनारायणकोटियालः

वहत्यार्द्रसुधासिक्ता
पुष्पचन्दनवल्लिभिः।
युक्ता मुक्तफलाकांक्षी
हिमाद्रौ वाति केवलम्।।१।।

स्निग्धामोदमयी च्छाया,
वितानानेक-तापसान्।
सज्जनेवोपकुर्वन्ति,
शुभार्थे सरलद्रुमाः।।२।।

मनोहराणि पत्राणि
सिन्दूरशाखिनामिह।
नवोढेव तुषाराद्रेः
भूषयन्ति वनश्रियम्।।३।।

पादपानां हि बालानां
प्रभिन्न-कुसुमानि च।
आनाकं सौरभं यत्र
प्रापयन्ति पुनः पुनः।।४।।

पुरा हि प्रथमं पद्मं,
हरये दत्तवानजः।
ब्रह्माख्यकमलं जातं,
विख्यातं तत् हिमालये।।५।।

नभसि पीतपुष्पाणि,
दमनस्यौषधेः जनान्।
जनयन्ति महानन्दं,
तस्मात् स्वर्गायते मही।।६।।

वृन्देयं बदरीशाय
आपादलम्बिनीति स्त्रग्।
भूत्वा सर्वस्वदा देवी
नारायणी प्रतिष्ठिता।।७।।

पादपाश्च प्ररोहन्ति,
सघने तुलसीवने।
मन्ये तद्वीक्ष्य देवर्षिः
न्वग्रहीत् हरिपूजनम्।।८।

तपोभिश्चाग्निदेवेन
नारायणपदार्पितम्।
धृतं स्वरूपं धौतोष्ण-
धारायाः सर्वसौख्यदम्।।९।।

अग्नेर्जलमयं रूपं
भक्त्या हि दृश्यते सदा।
तीर्थे स्नात्वा विलीयन्ते
पापानि तत्र विश्रुतम्।।१०।।

कल्मषं सर्वधातूनां
यथाग्नौ परिशुद्ध्यते।
तप्तोदके भवन्त्यत्र
भस्मीभूताः शिवेतराः।।११।।

हिमं भूयिष्ठमहिमं
आविश्वं तृप्तिकारणम्।
क्वचिच्चोष्णसरःप्राप्ति-
स्त्वनौपम्येन भूषितम्।।१२।।

## संस्कृतमहिमपञ्चकम्

म. म. शशिधरशर्मा (वाचस्पतिः)

निधानं सर्वविद्यानां विधानं सर्वसम्पदाम्।
आधानं दिव्यधर्माणां तत्संस्कृतमितीरितम्।। १।।

स्वान्तसन्तर्पणं शश्वद् विदुषां विश्ववर्तिनाम्।
भुवः पीयूषमेकान्तं तत्संस्कृतमितीरितम्।। २।।

चतुर्णां पुरुषार्थानां यत्र सम्यङ्निबन्धनम्।
बन्धनं यत् परं प्रीतेस्तत्संस्कृतमितीरितम्।। ३।।

ज्ञानं विज्ञानमपि च यस्य पक्षौ सदोज्ज्वलौ।
लीलौकस्तस्य हंसस्य तत्संस्कृतमितीरितम्।। ४।।

ऋषीणां संस्कृतेः कोशः पोषो दैव्याश्च सम्पदः।
प्रज्ञायाः परमस्तोषस्तत्संस्कृतमितीरितम्।। ५।।

श्रीसाहित्यसुधासदनम्
H. No. 349
मिल्क कालोनी, धनास, चण्डीगढम्

## रघुनाथकीर्तिपञ्चकम्

प्रो. बनमालीबिश्वालः

यावदिह देवभूमिः यावदत्र देवप्रयागो भाति।
तावद्रघुनाथकीर्ति-परिसरो विलसिष्यति सुतराम्।१।

देवभूमिसौरभमिह गवेषणायै समर्पितं केवलम्।
नैतद्राष्ट्रियं किन्तु स्वरूपमस्यान्ताराष्ट्रियम्।२।

रघुनाथीयपताका प्रकटयति या परिसरीय-प्रतिभाम्।
विदुषामथ शोधपरां छात्राणामपीहाभिनवाम्।३।

रघुनाथवार्तावली कृपया श्रीरघुनाथस्य प्रसरेत्।
दिशि दिशि प्रापयेदथ वार्ताः परिसरस्याभिनवाः।४।

वहति न गङ्गैवास्माद्भागिरथ्यलकनन्दयोः सङ्गमात्।
काचिदभिनवा प्रवहति संस्कृतगङ्गाऽऽदिप्रयागात्।५।

## काऽस्ति गङ्गे ! त्वदन्या ?

-प्रो. बनमाली बिश्वालः

त्रातुं लोके सगर-तनयान्स्वर्गलोकाद् धराया-
माविर्भूता त्वमसि भुवने कल्पयन्ती सुधात्वम्।
स्वर्गे मर्त्ये प्रथितयशसा पावयन्तीह धन्यान्
मातर्दक्षा दुरितहरणे काऽस्ति गङ्गे ! त्वदन्या?।१।

नित्या मुक्ता त्रिजगति पुनर्नास्ति मातस्त्वमिव
मिथ्याभूते जगति च पुनर्ब्रह्मभावं वहन्ती।
देशे देशे प्रथयसि सदाऽनेकवादे त्वमैक्यम्।
तत्त्वातत्त्वानुभवकुशला काऽस्ति गङ्गे ! त्वदन्या?।२।

मोहं प्राप्ताः प्रथितकवयः कीर्तने त्वद्गुणानां
मूल्यं ज्ञातुं तव जगति को लोकशक्त्या समर्थः।
दैवी शक्तिर्न भवति सदा कोऽत्र वेत्ता तवास्ति
निष्पक्षाऽत्र जननि ! सततं काऽस्ति गङ्गे ! त्वदन्या?।३।

दुःखार्तानां हरसि महतीं त्वञ्च पीडां समन्तात्
दुर्भाग्येभ्यो वहसि करुणाश्चेतसि त्वञ्च लोके।
दृष्ट्वा लोकान् विषमविपदैः पीडितान् दीनहीनान्
आशुत्राणे वद सकुशला काऽस्ति गङ्गे ! त्वदन्या?।४।

स्वर्गे लोके प्रवरवनितालिङ्गने यच्च सौख्यं
मातुः क्रोडे जननि ! लभते याञ्च बालोऽत्र शान्तिम्।
तुल्यं तोषं त्वयि च लभते स्नानमात्रेण लोकः।
देवैर्वन्द्या वद वरसरित् ! काऽस्ति गङ्गे ! त्वदन्या?।५।

या वै शान्तिः हरचरणयोर्लभ्यते पुण्यभाग्भिः
यं सन्तोषं प्रभवति समाप्तुञ्च योगीह लोके।
लब्धुं योग्यं भवति करुणाकारणात्तेऽत्र लोकः
स्वर्गे मर्त्ये प्रथितकरुणा काऽस्ति गङ्गे ! त्वदन्या?।६।

मातर्गङ्गे ! दलसि पयसा पातकं पापभाजाम्
म्लेच्छो निन्द्यस्तव करुणया याति पापाब्धिपारम्।
भाग्यैर्हीनस्तव चरणयोर्विन्दति भाग्यजातम्
भोगैश्वर्ये निखिल-भुवने काऽस्ति गङ्गे ! त्वदन्या?।७।

# साहित्यखण्डः

## कुलगीतम्

-प्रो. रामकरणशर्मा

हिमगिरिवदनं समुद्रचरणं
गङ्गागोदासुधारसम्।
विश्वविश्ववन्दितसद्विद्यं
राष्ट्रियसंस्कृतसंस्थानम्।।१।।

योऽनूचानः स नो महानिति
शास्ति विमलमचलं भणितम्।
निखिलभारते व्याप्तपरिसरं
राष्ट्रियसंस्कृतसंस्थानम्।।२।।

सवेदवेदाङ्गषड्दर्शन-
पुराणकाव्यैरलङ्कृतम्।
बौद्धजैनशैवागममहितं
राष्ट्रियसंस्कृतसंस्थानम्।।३।।

एकं सत्यमनन्तविग्रहं
समुपास्तेऽनिशमेकस्थम्।
जयति जयति सद्विद्यारत्नं
राष्ट्रियसंस्कृतसंस्थानम्।।४।।

समेधयति भारतीः समस्ताः
प्रणमति निखिलां वसुन्धराम्।
जयति सकलपुरुषार्थसाधकं
राष्ट्रियसंस्कृतसंस्थानम्।।५।।

## श्रीरघुनाथपञ्चकम्

-डा. शैलेन्द्रप्रसादउनियालः

देवप्रयागे हि सुरम्यतीर्थे
यशांसि गायामि रघूत्तमस्य।
क्षेत्रेऽत्र विद्यासुविचारकेन्द्रे
भवन्ति कार्याणि नवानि नित्यम्।।१।।

पञ्चप्रयागेऽन्यतमं च तीर्थं
हिमालये वै नगरं विशिष्टम्।
सुदूरदिग्भ्यस्तु समागता ये
वसन्ति तीर्थे प्रवराः पुरोहिताः।।२।।

नृसिंहनारायणपर्वतेऽस्मिन्
सङ्कल्पितज्ज्ञानविशेषकेन्द्रम्।
राष्ट्रियसंस्थानकृतः प्रयासः
विद्याविकासाय सतां हिताय।।३।।

वेदैश्च वेदाङ्गयुता विभागाः
न्यायेन साहित्यसुसङ्गताश्च।
विद्यार्थिनः ह्यत्र विचारशीलाः
तपन्ति प्राध्यापकवृन्दसार्द्धम्।।४।।

वार्तावली या रघुनाथकीर्त्ते-
र्ज्ञानस्य गङ्गा प्रतिभाति सङ्गा।
भागीरथी भाग्यविकासिनी या
साल्कायुतानन्दविधायिनी स्यात्।।५।।

१४. सत्यापनसमितिः

(पुस्तक-भण्डार-फर्नीचर-फिक्सर-स्टेशनरी आदि)

– डा. आर. बालमुरुगन् (संयोजकः)

डा. अरविन्दगौरः

डा. एस.पी. उनियालः

१५. निःशक्तजन-सहायता-प्रकोष्ठः

– डा. एस.एन. कोटियालः (संयोजकः)

डा. मनीषजुगरानः

डा. एस.पी. उनियालः

१६. महिला-उत्पीडननिषेधसमितिः

– प्रो. बनमालीबिश्वालः (संयोजकः)

डा. प्रफुल्लगडपालः

डा. मुकेशकुमारः

श्रीमती पल्लवी बन्दोलिया

१७. व्यक्तित्त्वसंवर्धन-जीविकानियोजन-परामर्श-समितिः

– डा. प्रफुल्लगडपालः (संयोजकः)

डा. मुकेशकुमारः

डा. मनीषजुगरानः

डा. श्रीओमशर्मा

१८. सूचना-अधिकार-प्रकोष्ठः

– प्रो. बनमाली बिश्वालः

(केन्द्रीयसूचना अधिकारी)

१९. स्थानीयशोधसमितिः

– प्रो. बनमाली बिश्वालः (संयोजकः)

डा. आर. बालमुरुगन्

डा. प्रफुल्लगडपालः

डा. विनीतघिल्डियालः (विभागाध्यक्षः, संस्कृतविभागः, हेमवतीनन्दनबहुगुणा-केन्द्रीयविश्वविद्यालयः, श्रीनगरम् गढवालः (उत्तराखण्डः)

– प्रो. मोहनचन्द्रबलोदी, उत्तराखण्ड-संस्कृत-विश्वविद्यालयः, हरिद्वारम् (उत्तराखण्डः)

२०. राष्ट्रियसेवायोजनासमितिः

– डा. प्रफुल्लगडपालः (संयोजकः)

डा. मुकेशकुमारः

डा. श्रीओमशर्मा

डा. मनीषजुगरानः

२१. प्रेस-प्रिण्टिंग-विज्ञापन-सूचनाप्रसारण-जनसम्पर्कसमितिः

– प्रो. बनमाली बिश्वालः (संयोजकः)

डा. प्रफुल्लगडपालः

डा. मनीषजुगरानः

डा. अरविन्दगौरः

डा. मुकेशकुमारः

डा. श्रीओमशर्मा

२२. पारदर्शिता-जागरुकता-निष्पादनसमितिः

– डा. प्रफुल्लगडपालः (संयोजकः)

डा. मनीषजुगरानः

डा. एस.पी. उनियालः

डा. श्रीओमशर्मा

डा. सुशीलप्रसादः

२३. छात्रकल्याणकोशसमितिः

– डा. आर. बालमुरुगन् (संयोजकः)

डा. मुकेशकुमारः

डा. एस.पी. उनियालः

श्री अनुरुद्धकुमारत्रिपाठी

सुश्री प्राची नौटियालः

२४. क्रीडासमितिः

– डा. प्रफुल्लगडपाल (संयोजकः)

डा. मनीषजुगरानः

डा. मुकेशकुमारः

डा. अरविन्दगौरः

डा. श्रीओमशर्मा

डा. सुशीलप्रसादः

श्री सन्दीपसिंहरावतः

२५. छात्रपरामर्शकेन्द्रम्

– प्रो. बनमाली बिश्वालः (संयोजकः)

डा. आर. बालमुरुगन्

डा. प्रफुल्लगडपालः

डा. एस.एन. कोटियालः

डा. मुकेशकुमारः

डा. श्रीओमशर्मा

२६. निर्माणसमितिः

– प्रो. के.बी. सुब्बरायुडुः (प्राचार्यः)

प्रो. बनमाली बिश्वालः

डा. आर. बालमुरुगन्

डा. प्रफुल्लगडपालः

डा. एस.एन. कोटियालः

## परिसरस्य विविधाः समितयः

१. **प्रवेशसमितिः**

- डा. प्रफुल्लगडपालः (संयोजकः)
  डा. एस.एन. कोटियालः
  डा. मनीषजुगरानः
  डा. एस.पी. उनियालः

२. **अनुशासनसमितिः**

- डा. आर. बालमुरुगन् (संयोजकः)
  डा. एस.एन. कोटियालः
  डा. मुकेशकुमारः
  डा. श्रीओमशर्मा
  डा. अरविन्दगौरः
  डा. मनीषजुगरानः
  श्रीमती पल्लवी बन्दोलिया

३. **छात्रवाससमितिः**

- प्रो. बनमालीबिश्वालः (संयोजकः)
  डा. प्रफुल्लगडपालः
  डा. मुकेशकुमारः
  श्रीमती पल्लवी बन्दोलिया

४. **पुस्तकालयसमितिः**

- डा. आर. बालमुरुगन् (संयोजकः)
  डा. प्रफुल्लगडपालः
  डा. मनीषजुगरानः
  डा. सुशीलप्रसादः
  श्रीमती पल्लवी बन्दोलिया

५. **शैक्षिकसमितिः**

- प्रो. बनमाली बिश्वालः (संयोजकः)
  डा. एस.एन. कोटियालः
  डा. श्रीओमशर्मा
  डा. अरविन्दगौरः
  डा. मुकेशकुमारः

६. **सांस्कृतिक-शास्त्रीय-कलासमितिः**

- डा. प्रफुल्लगडपालः (संयोजकः)
  डा. मनीषजुगरानः
  डा. मुकेशकुमारः
  डा. एस.पी. उनियालः

७. **छात्रवृत्तिसमितिः**

- प्रो. बनमाली बिश्वालः (संयोजकः)
  डा. आर. बालमुरुगन्
  डा. एस.एन. कोटियालः
  डा. मुकेशकुमारः
  डा. एस.पी. उनियालः

८. **परीक्षासमितिः**

- प्रो. बनमाली बिश्वालः (संयोजकः)
  डा. प्रफुल्लगडपालः
  डा. मुकेशकुमारः
  डॉ. अरविन्दगौरः

९. **पत्रिकाप्रकाशनसमितिः**

- **सम्पादक-मण्डलम्**
  प्रो. बनमाली बिश्वालः
  डा. आर. बालमुरुगन्
  डा. प्रफुल्लगडपालः
  डा. एस.एन. कोटियालः
- **सह-सम्पादकमण्डलम्**
  डा. मुकेशकुमारः
  डा. अरविन्दगौरः
  डा. एस.पी. उनियालः
  डा. मनीषजुगरानः
  डा. श्रीओमशर्मा
  डा. सुशीलप्रसादः

१०. **रैगिंगनिषेधसमितिः**

- डा. आर. बालमुरुगन् (संयोजकः)
  डा. मुकेशकुमारः
  डा. मनीषजुगरानः
  श्रीमती पल्लवी बन्दोलिया

११. **अध्यापक-अभिभावक-परामर्श-समितिः**

- प्रो. बनमाली बिश्वालः (संयोजकः)
  डा. आर. बालमुरुगन्
  डा. प्रफुल्लगडपालः
  डा. एस.एन. कोटियालः
  डा. मुकेशकुमारः
  श्रीमती पल्लवी बन्दोलिया

१२. **योजना-परियोजना-विकास-समितिः**

- डा. आर. बालमुरुगन् (संयोजकः)
  डा. प्रफुल्लगडपालः
  डा. मुकेशकुमारः
  डा. मनीषजुगरानः
  डा. अरविन्दगौरः

१३. **क्रय-विक्रय-प्रिटिंग-फोटोग्राफी-समितिः**

- प्रो. बनमाली बिश्वालः (संयोजकः)
  डा. प्रफुल्लगडपालः
  डा. एस.एन. कोटियालः
  डा. मुकेशकुमारः
  डा. मनीषजुगरानः

## शोध-प्रकाशनविभाग-समितेः उपवेशनं सम्पन्नम्

१९.१२.२०१६ तमे दिनाङ्के २१.१२.२०१६ तमे दिनाङ्के च परिसर-प्राचार्याणामाध्यक्षे शोधप्रकाशन-विभागाध्यक्षस्य प्रो. बनमालीबिश्वालस्य संयोजनायाम् समेषां शैक्षणिक-सदस्यानां तथा पुस्तकालयसदस्यानां विशिष्टमुपवेशनद्वयं सम्पन्नम्।

अत्र स्थानीयशोधसमितेः सङ्घटनमभवत्, यत्र अधोलिखिताः सदस्याः सर्वसम्मत्या मनोनीताः सन्ति-

| | | | |
|---|---|---|---|
| १. | प्रो. के. बी. सुब्बरायुडुः | – | अध्यक्षः |
| २. | प्रो. महावीरअग्रवालः | – | सम्मानित-बाह्य-सदस्यः |
| ३. | प्रो. विनीतघिल्डियालः | – | सम्मानित-बाह्य-सदस्यः |
| ४. | डा. आर. बालमुरुगन् | – | आभ्यन्तर-सदस्यः |
| ५. | डा. प्रफुल्लगडपालः | – | आभ्यन्तर-सदस्यः |
| ६. | प्रो. बनमाली बिश्वालः | – | संयोजकः |

एतयोः उपवेशनयोः प्रदत्तेषु अंशेषु चर्चा समभूत्-

१. अस्मिन्नुपवेशने उत्तराखण्ड-विद्या-वैभवमिति विषयमधिकृत्य ०८.०३.१७ तः १०.०३.१७ यावत् कस्याश्चिद् अन्ताराष्ट्रिय-सङ्गोष्ठ्याः आयोजनविषये चर्चा समभूत्।

२. पुस्तकालयस्य कृते शोधोपयोगि-पुस्तकानां क्रयणविषये तथा प्रसिद्धशोधपत्रिकाणामन्यासां पत्रिकाणाञ्च सदस्यता-स्वीकृति-विषयेऽपि निर्णयो गृहीतः।

३. २०१७ तमे वर्षे परिसरे आयोजयिष्यमाणस्य युवमहोत्सवस्य आयोजन-प्रसङ्गे पूर्वप्रस्तुतिविषयिणी चर्चाऽपि अनयोरुपवेशनयोः प्रमुख-विषयेषु अन्यतमा आसीत्।

## छात्रप्रातिभम्

अभिनन्दनम्

**श्यामदेवशर्मा**–परिसरे व्याकरणशास्त्रे शास्त्रिप्रथमवर्षे अधीयानः श्यामदेवशर्मनामा अयं छात्रः राज्य-स्तरीयशास्त्रीयस्पर्धान्तर्गततया आयोजितायां शास्त्रीयस्फूर्तिस्पर्धायां प्रथमं स्थानं लब्ध्वा अगरतलायां समायोजितायाम् अखिलभारतीयशास्त्रीयस्पर्धायां भागमगृह्णात्।




**नौटियालप्राची**–परिसरे व्याकरणशास्त्रे शास्त्रिप्रथमवर्षे अधीयाना प्राचीनौटियालः इति इयं छात्रा राज्यस्तरीयशास्त्रीयस्पर्धान्तर्गततया आयोजितायाम् अष्टाध्यायीकण्ठपाठस्पर्धायां चतुर्थं स्थानं प्राप्नोत्।

**मनीषपन्तः**–अगरतलायां आयोजिते अन्तःपरिसरीय-युवमहोत्सवे परिसरे शास्त्रिप्रथमवर्षे साहित्यशास्त्रे अधीयानः अयं छात्रः मनीषपन्तः १५०० मी. धावनस्पर्धायां कांस्यपुरस्कारमलभत।

## समुद्घाटितः परिसरस्य अन्तर्जालः

देवप्रयागस्थस्य श्रीरघुनाथकीर्तिपरिसरस्य अन्तर्जालः समुद्घाटितोऽभवत्। "www.srkcampus.org" इति सङ्केतेन अन्तर्जालः द्रष्टुं शक्यते। अस्मिन् चित्ताकर्षके सूचनायुते च अन्तर्जाले परिसरस्य कार्यजातं भविष्यकालीनाश्च कार्यक्रमाः द्रष्टुं शक्यन्ते। अत्र शैक्षणिकविभागैः सह प्रशासनिकविभागस्य सूचना अपि वर्तन्ते। परिसरे सञ्चालितानां पाठ्यक्रमाणामत्र संक्षिप्तं विवरणं स्थापितं वर्तते। अपि च अत्र संस्थानेन परीक्षार्थं सञ्चालितानां पाठ्यक्रमाणां सम्पूर्णं विवरणमपि द्रष्टुं शक्यते। सहैवात्र परिसरप्राचार्यप्रमुखपरिसरीयाध्यापकानामपि परिचयः शैक्षणिकविवरणञ्च प्रदत्तं वर्तते। अस्मिन् अन्तर्जाले प्रवेशस्य परीक्षायाश्च आवश्यक्यः सूचनाः प्रदत्ताः सन्ति। काले-काले दीयमानानां विज्ञापनानां सूचनानां च दर्शनार्थमप्यत्र विशिष्टा व्यवस्था वर्तते। संस्थानस्य वार्तानां कृते अत्र एकः अंशः कल्पितो वर्तते। तथैव ई-पुस्तकालयस्यापि सङ्कल्पना कृता वर्ततेऽत्र। परिसरीयप्रकाशनानां सूचनार्थमत्र एकः स्थायिस्तम्भः वर्तते, यत्र परिसरे प्रकाशिताः ग्रन्थाः, पत्रिकाः शोधपत्रिकाश्च द्रष्टुं शक्यन्ते। नूनमयम् अन्तर्जालः परिसरस्य एकः आदर्शः वर्तते, यत्र सर्वाः आवश्यक्यः सूचनाः उपस्थापिताः सन्ति। अस्य अन्तर्जालस्य संरचना संस्कृतसङ्गणकविदुषा डा. अभिजिद्दीक्षितेन कृता अस्ति। तत्र च संयोजनं डा. प्रफुल्लगडपालेन विहितम्, सहयोगश्च पङ्कजकोटियाल-सन्दीपसिंहरावताभ्याम् आचरितः।




## डा. कोटियालः परिषदः सदस्यरूपेण नामितः

उत्तराखण्डशासनस्य संस्कृतशिक्षानुभागेन संस्कृत-अकादम्याः साफल्यार्थम् उच्चस्तरीयसमित्याः सङ्घटनं विहितम्। शासनस्य पत्राङ्के 7-98/XLJI&1/ 2016&02(03)2016 ०१.१०.२०१६ तमे दिनाङ्के अपरसचिवमहोदयेन संस्कृत-अकादम्याः अभ्युदयार्थं तथा च महत्त्वपूर्णयोजनां निर्मातुं सप्तसदस्यसमितेः गठनं विधाय, शिक्षाक्षेत्रस्य विद्वांसः नामितीकृताः। अस्यां समित्यां डा. शैलेन्द्रनारायण-कोटियालवर्यस्य चयनं हर्षप्रदं वर्तते। अनेन देवप्रयागक्षेत्रस्य गौरवं वर्धते। डा. कोटियालः संस्कृतस्य समुन्नत्यै नैकेषु क्षेत्रेषु कार्यमकरोत्। देवप्रयागे राष्ट्रियसंस्कृतसंस्थानस्य स्थापनार्थमपि श्रीरघुनाथकीर्ति-आदर्श-संस्कृत-महाविद्यालयस्य प्रभारी-प्राचार्यत्वेन डा. कोटियालः मनोयोगपुरस्सरं सततं कार्यं कृतवान्।

## परिसरे आयोजयिष्यते दशमः अन्तःपरिसरीय-युवमहोत्सवः

२०१७ तमे वर्षे अक्टूबरमासस्य अन्तिमसप्ताहे देवप्रयागस्थ-श्रीरघुनाथकीर्तिपरिसरे अन्तःपरिसरीयः युवमहोत्सवः आयोजयिष्यते। अगरतलायाम् आयोजिते युवमहोत्सवस्यान्तर्वर्तिनि उपवेशने २०.११.२०१६ तमे दिनाङ्के संस्थानकुलपतिना प्रो. पी.एन. शास्त्रिणा संस्थान-परिसरप्राचार्यैः सह उपवेशने एतद्विषयिणी चर्चा विहिता। अत्रैव परिसरप्राचार्यः प्रो. सुब्बरायुडुः देवप्रयागस्थ-श्रीरघुनाथकीर्तिपरिसरे युवमहोत्सवस्य आयोजनार्थं स्वपक्षं प्रास्तौत्। कुलपतेः आध्यक्ष्ये सर्वैरस्यानुमोदनं कृतम्। ततः २१.११.२०१६ तमे दिनाङ्के कुलपतिना एतस्य महोत्सवस्य आयोजनार्थं परम्परानुशंसितं गौरवपुरस्सरं ध्वजं प्राचार्याय प्रो. सुब्बरायुडुवर्याय प्रदत्तमिति सर्वे हर्षमन्वभवन्।

उत्तराखण्डस्य देवप्रयागनगरे स्थितोऽयं नूतनः श्रीरघुनाथकीर्तिपरिसरः स्वीयैः सर्वविधक्रियाकलापैः अनुदिनं प्रवर्धते। १६.०६.२०१६ तमे दिनाङ्के समुद्घाटितेऽस्मिन् परिसरे प्राचार्यमहोदयः एतमेव अभ्युदयं चिन्तयन् त्वरया कार्याणि सम्पादयन् वर्तते। युवमहोत्सवे राष्ट्रियसंस्कृतसंस्थानस्य द्वादशपरिसराणां प्रतिभागिनः छात्रा निर्णायकाः, विद्वांसः, प्राचार्याः, कुलपतयश्च समागमिष्यन्ति। एतस्य महोत्सवस्य कृते इदानीं पूर्वाङ्गतया सज्जीकरणं प्रचलति। एतत्समारोहार्थम् उत्तराखण्डस्य जनाः समुत्सुकाः प्रतीयन्ते, तत्कृते प्रतीक्षमाणाश्च दृश्यन्ते। वस्तुतः तत्समये तीर्थाटने समागताः भारतीयाः वैदेशिकाश्च तीर्थयात्रिणोऽपि युवमहोत्सवस्य ऐन्द्रधनुषीं छटाम् अवलोकयन्तः पुण्यभाजः भविष्यन्तीति नात्र सन्देहः।

## प्रवर्तते शोधपरियोजना

राष्ट्रियसंस्कृतसंस्थानप्रायोजिता दर्शनविभागीया शोधपरियोजना "बौद्धतर्कभाषासटिप्पणं सम्पादनम्" प्राचार्यस्य प्रो. के.बी. सुब्बरायुडुमहोदयस्य निर्देशने संयोजने च तथा डा. आर बालमुरुगन् महोदयस्य च सहसंयोजने परिसरेऽस्मिन् प्रवर्तते। प्रो. सुब्बरायुडुमहोदयेन प्रस्ताविताऽङ्गीकृता चेयं परियोजना जम्मूपरिसरादत्र स्थानान्तरिता वर्तते। अस्यां परियोजनायां टङ्कणादिकार्यं सम्पादयितुं श्रीओमप्रकाशस्य नियुक्तिः दिसम्बरमासे अभवत्।

## परिसरेण सञ्चालिताः विविध-पाठ्यक्रमाः

नवदेहलीस्थस्य राष्ट्रियसंस्कृतसंस्थानस्य त्रयोदशेऽस्मिन् श्रीरघुनाथकीर्तिपरिसरे अधोलिखिताः पाठ्यक्रमाः व्याकरण-साहित्य-ज्योतिष-वेद-न्यायविभागेषु सञ्चाल्यन्ते-

**१. प्राक्शास्त्री ( पूर्वस्नातकम्/इण्टरमीडिएट )**

**२. शास्त्री ( स्नातकम्/बी.ए. )**

**३. आचार्यः ( स्नातकोत्तरम्/एम.ए. )**

**४. विद्यावारिधिः ( पीएच. डी. )**

उपर्युक्तैः विषयैः सममत्र हिन्दी-अंग्रेजी-इतिहास-सङ्गणक-विज्ञान(कम्प्यूटर साइंस)सदृशेषु आधुनिकविषयेष्वपि औपचारिकशिक्षणं प्रदीयते। छात्राणां कृते अत्र शारीरिकशिक्षायाः प्रशिक्षण-व्यवस्था अपि वर्तते। साम्प्रतमत्र विविधशास्त्रेषु १६ प्राध्यापकाः कार्यरताः वर्तन्ते। संस्कृतशिक्षकान् प्रशिक्षितान् कर्तुमत्र अग्रिम-शिक्षा-वर्षात् (२०१७-१८) शिक्षाशास्त्री (बी.एड.)-पाठ्यक्रमोऽपि आरप्स्यते। कालान्तरेणात्र शिक्षाचार्य(एम.एड.)-पाठ्यक्रमोऽपि सञ्चालयिष्यते। अत्र विद्यावारिधिः (पीएच.डी.) इति उपाधये पाठ्यक्रमः अपि प्रारब्धोऽस्ति। अग्रिमे वर्षेऽत्र दूरस्थशिक्षणपाठ्यक्रमः अपि प्रारप्स्यते।

## निर्मास्यन्ते परिसरभवनानि

नूतनोद्घाटितस्य श्रीरघुनाथकीर्तिपरिसरस्य भवनादीनां निर्माणम् अचिरादेव सम्भवति। १२.११.२०१६ तमे दिनाङ्के कुलपतिमहोदयेन भूपूजानन्तरं निर्माणकार्यारम्भः विहितः। परिसरस्य प्राचार्यः प्रो. रायुडूमहोदयः अनुदिनं कार्यसमीक्षणपुरस्सरं परिसरं परितः रक्षाभित्तिनिर्माणं कारयति। छात्रावासनिर्माणाय शैक्षणिकप्राशासनिकभवननिर्माणाय च सम्भावितव्ययस्य प्राक्कलनमपि समासादितम् प्राचार्येण। शीघ्रमेव केन्द्रीयलोकनिर्माणविभागमाध्यमेन देवप्रयागे श्रीरघुनाथकीर्तिपरिसरस्य दर्शनीयानि भवनानि निर्मास्यन्ते।

## विशिष्टपुरस्कारेण सभाजितः प्रो. बिश्वालः

श्रीरघुनाथकीर्तिपरिसरस्य व्याकरणविभागाध्यक्षः प्रो. बनमाली बिश्वालः उत्तरप्रदेश-संस्कृत-संस्थानस्य विशिष्टपुरस्कारेण पुरस्कृतोऽभवत्। २३.०७.२०१६ तमे दिनाङ्के उत्तरप्रदेशस्य मुख्यमन्त्रिणा श्रीअखिलेशयादवेन प्रो. बिश्वालमहोदयः उत्तरप्रदेशसंस्कृत-संस्थानस्य विशिष्टपुरस्कारेण पुरस्कृत इति वार्तामाकर्ण्य परिसरीयाः सर्वे हर्षान्विताः अभूवन्। उल्लेखनीयमस्ति यद् प्रो. बिश्वालमहोदयः संस्कृत-ओडिआ-आङ्ग्ल-हिन्दीभाषासु नैकानि पुस्तकानि रचितवान्। प्रो. बिश्वालस्य विविधां शैक्षणिकीमुपलब्धिं केन्द्रीकृत्य संस्थानेनोक्त-विशिष्टपुरस्कारस्तस्मै प्रदत्तः।



मुख्यमन्त्रिणः करकमलाभ्यां पुरस्कारं स्वीकुर्वन् प्रो. बिश्वालः

संस्कृतलेखने नवविधां प्रवर्तयितुं प्रो. बिश्वालेन महत्कार्यं सम्पादितम्। नैकासां पत्रिकाणां सफलसम्पादनमप्येतैः विधीयते। एतदवधौ "पद्यबन्धा"-पत्रिकायाः प्रधानसम्पादकत्वेन तस्य नवमाङ्कस्य मुख्यसम्पादकीय-दायित्वम् अनेन निर्व्यूढम्। "दृक्"-पत्रिकायाः ३१ अङ्कानां तथा च "कथासरित्" इति पत्रिकायाश्च २२ अङ्कानां सम्पादनमपि डा. बिश्वालेन अद्यावधि विहितमस्ति। प्रयागस्थगङ्गानाथ-झा-परिसरस्य शोधपत्रिकायाः दशाधिकाः संयुक्ताङ्काः एतैः सम्पादिताः।

एतदतिरिच्य अक्टूबर (२०१६) मासे उत्तरप्रदेशसंस्कृतसंस्थानस्य विविधपुरस्कारैः अप्यस्य नवीनानि त्रीणि पुस्तकानि (पत्रालयः, जन्मान्धस्य स्वप्नः, जगन्नाथसुभाषितञ्च) पुरस्कृतानि सन्ति इति घोषणा समभवत्।

## पालितः श्रीगणेशोत्सवः

देवप्रयागस्य (उत्तराखण्डस्य) श्रीरघुनाथकीर्तिपरिसरे श्रीगणेशोत्सवः महतोत्साहेन पालितोऽभवत्। ५.९.२०१६ तमे दिनाङ्के समायोजितेऽस्मिन्नुत्सवे परिसरपरिवारस्य प्राध्यापकाः, छात्राः, कर्मचारिणश्च उत्साहपूर्वकं भागमगृह्णन्। वैदिकमन्त्रोपचारेण स्वस्त्ययन-शान्तिपाठपुरस्सरं भगवतो विनायकस्य अभिषेकार्चनं सर्वैः श्रद्धया विहितम्। वेदविभागस्य डा. शैलेन्द्रप्रसादउनियालमहोदयेन अस्य समारोहस्य पूजनादिकं श्रुतिविहितविधानेन सम्पादितम्। कार्यक्रमेऽस्मिन् छात्रैः कर्मचारिभिश्च सार्द्धं डा. आर. बालमुरुगन्, डा. प्रफुल्लगडपालः, डा. शैलेन्द्रनारायणकोटियालः, डा. सुशीलप्रसादः, डा. मनीषजुगरानः, श्री श्रीओमशर्मा, डा. मुकेशकुमारशर्मा प्रभृतयः भागं गृहीतवन्तः। समारोहस्य सम्पूर्त्यां परिसरस्य सर्वे प्रेम्णा मोदकप्रसादं लब्ध्वा हर्षानन्दमन्वभवन्। जयघोषैश्चास्य समारोहस्य सम्पूर्तिः सञ्जाता।

## राज्यस्तरीया शास्त्रीयस्पर्धाः

नवदेहलीस्थ-राष्ट्रियसंस्कृतसंस्थानेन ४.११.२०१६ तः ५.११.२०१६ दिनाङ्कपर्यन्तम् आयोजितासु राज्यस्तरीयशास्त्रीयस्पर्धासु श्रीरघुनाथकीर्तिपरिसरस्य विद्यार्थिनः भागं गृहीतवन्तः। तत्र च ते सप्तस्पर्धासु प्रदर्शनं कृतवन्तः। स्फूर्तिस्पर्धायां शास्त्री-प्रथमवर्षस्य च्छात्रः श्यामदेवः प्रथमं स्थानं लब्ध्वा परिसरस्य गौरवम् अवर्धत। ज्योतिषभाषणे आचार्यप्रथम-वर्षच्छात्रः गङ्गाशरणः द्वितीयस्थानं प्राप्तवान्। तत्र संयोजकत्वेन डा. मनीषजुगरानः परिसरच्छात्राणां मार्गदर्शनमकरोत्।

श्यामदेवः गङ्गाशरणः च राष्ट्रस्तरीयस्पर्धायां भागं ग्रहीतुं श्रीरघुनाथकीर्तिपरिसरपक्षतः दिसम्बरमासस्य अन्तिमसप्ताहे एकलव्यपरिसरम् अगरतल्लां प्रति गतवन्तौ। परिसरस्य व्याकरणविभागाध्यक्षैः प्रो. बनमालीबिश्वाल-महोदयैः तत्र भाषणस्पर्धा-शलाका-अन्त्याक्षरादिषु पञ्च-प्रतियोगितासु निर्णायकदायित्वं निर्व्यूढम्। परिसरस्य प्राचार्यैः प्रो. के.बी. सुब्बरायुडुमहोदयैरपि तत्र समापनसत्रे मुख्यातिथित्वं निर्व्यूढम्।

## अन्तःपरिसरीय-नाट्यमहोत्सवे भविष्यति नाट्यप्रस्तुतिः

नवदेहल्यां २७.०२.२०१७ तः ०१.०३.२०१७ इत्यवधौ नवदेहलीस्थ-राष्ट्रियसंस्कृतसंस्थानेन चतुर्दशः नाट्यमहोत्सवः (वसन्तोत्सवः) समायोज्यते। तत्र च देवप्रयागस्थ-श्रीरघुनाथकीर्तिपरिसरस्य छात्रैः आधुनिकनाटककारेण एच.वी. नागराजेन प्रणीतं लघुनाटकं "दाम्पत्यकलहम्" अभिनेष्यते। यद्यपि नूतनोऽयं परिसरः शिशुरिव वर्धमानोऽस्ति, तथापि समेषु अन्तःपरिसरीयकार्यक्रमेषु अहमहमिकया भागं गृह्णाति।

# नवमे अन्तःपरिसरीययुवमहोत्सवे छात्राणां भागग्रहणम्



युवमहोत्सवस्य उद्घाटनोत्सवावसरस्य दृश्यमेकम्

राष्ट्रियसंस्कृतसंस्थानेन प्रतिवर्षम् आयोज्यमानः अन्तःपरिसरीयो युवमहोत्सवः अस्मिन् वर्षे त्रिपुराराज्यस्य राजधान्याम् अगरतलायाम् अधिष्ठिते एकलव्यपरिसरे महता वैभवेन सुसम्पन्नः। अस्मिन् नवमे अन्तः परिसरीये युवमहोत्सवे अस्मिन्नेव हायने नूतनतया उद्घाटितः श्रीरघुनाथकीर्तिपरिसरः अपि महता उत्साहेन भागम् अगृह्णात्। परिसरप्राचार्यस्य प्रो. के.बी. सुब्बरायुडुवर्यस्य आध्यक्ष्ये अगरतलां गतः ३८ छात्राणां, ५ मार्गदर्शकानां च अयं गणः सर्वत्र प्रशंसाभाग् अभूत् इति प्रमोदस्य विषयः।

अस्मिन् अन्तःपरिसरीययुवमहोत्सवे संस्थानस्य सर्वैरपि त्रयोदशपरिसरैः भागः गृहीतः। श्रीरघुनाथकीर्तिपरिसरस्य दलेन युवमहोत्सवे भागं ग्रहीतुं नवम्बरमासस्य १३ दिनाङ्के देवप्रयागतः प्रस्थानं कृत्वा १७ दिनाङ्के अगरतलायां युवमहोत्सव-शोभायात्रायां भागः गृहीतः।

अस्य युवमहोत्सवस्य समुद्घाटनं १८.११.२०१६ तमे दिनाङ्के रवीन्द्रभवनस्य सभागारे संस्थानस्य कुलपतिः आचार्यः परमेश्वरनारायणशास्त्री अकरोत्। उद्घाटनभाषणे युवप्रतिभागिनाम् उत्तमोत्तमप्रतिस्पर्धानिमित्तम् उत्साहं पूरयता तेन सौहार्दपूर्णस्पर्धार्थं प्रतिस्पर्धिनाम् आह्वानं कृतम्। ततः परं विवेकानन्दक्रीडाङ्गणे क्रीडास्पर्धानाम् उद्घाटनकार्यक्रमे सुप्रसिद्धा क्रीडिका दीपाकर्माकर उपस्थाय सर्वेषाम् उत्साहवर्धनम् अकरोत्। तदारभ्य विवेकानन्दक्रीडाङ्गणे, रवीन्द्रभवने, परिसरभवने च दिनचतुष्टयं यावत् आहत्य ५९ स्पर्धाः अभूवन्। तासु स्पर्धासु सुभाषितकण्ठपाठ-वादविवाद-आशुभाषण-अनुवाद-स्फूर्त्यायादयः द्वादश शैक्षिकस्पर्धाः, आशुचित्रणादयः चतस्रः चित्रस्पर्धाः, शास्त्रीयगायनादयः नव सांस्कृतिकस्पर्धाः तथा ३४ क्रीडास्पर्धाः च आयोजिताः आसन्।




युवमहोत्सवे परिसरस्य शोभायात्रायाः किञ्चन दृश्यम्

श्रीरघुनाथकीर्तिपरिसरस्य छात्राः अत्र ४० स्पर्धासु सोत्साहं भागं गृहीतवन्तः तथा सर्वत्र एते प्रशंसिताः अभूवन्। अस्मिन् युवमहोत्सवे देशस्य प्रतिष्ठिताः विद्वांसः तत्तत्क्षेत्रीयाः विषयविशेषज्ञाः च निर्णायकत्वेन आहूताः आसन्। येषु आचार्यः अभिराजराजेन्द्रमिश्रः, आचार्यो जनार्दनहेगडे, डा. विश्वासः, आचार्यः मुरलीधरशर्मा, आचार्यः दौर्बलप्रभाकरशर्मा, तथा युवनिर्णायकेषु डा. प्रियव्रतमिश्रः, डा. दिपेशप्रभृतयो विद्वांसः तथा च त्रिपुराराज्यस्य सुप्रसिद्धाः क्रीडाविशेषज्ञाः च प्रमुखा आसन्। अत्र श्रीरघुनाथ-कीर्तिपरिसरस्य **शास्त्रिप्रथमवर्षस्य छात्रः मनीषपन्तः १५०० मीटरधावनस्पर्धायां कांस्यपदकं सम्प्राप्य** सर्वत्र प्रशंसाभाक् अभूत्। युवमहोत्सवस्य समापनकार्यक्रमे त्रिपुराराज्यस्य महामहिमराज्यपालः छात्रेभ्यः पुरस्कारप्रदानम् अकरोत्। युवमहोत्सवे भागं गृहीत्वा २६.११.२०१६ तमे दिनाङ्के समेऽपि छात्राः मार्गदर्शकैः प्राध्यापकैः सह उत्तराखण्डं सम्प्राप्ताः।




युवमहोत्सवे परिसरेण प्रस्तुतस्य सांस्कृतिककार्यक्रमस्य किञ्चन दृश्यम्







युवमहोत्सवे परिसरस्य कानिचन् दृश्यानि

**प्रशासन-सह-वित्त-विभागः–**

१. **श्रीभगवान् दासः** –(मो. नं. 9540520095, ई-मेल–bhagwandass0504@gmail.com)
कार्यालयसहायकरूपेण 13.01.2017 तमे दिनाङ्के कार्यभारं गृहीतवान्।

२. **श्री अनूपकुमारः** –(मो. नं. 7037548270, ई-मेल–kanup8128@gmail.com)
डाटा-एण्ट्री-आपरेटर-रूपेण 14.06.2016 तमे दिनाङ्के कार्यभारं गृहीतवान्।

३. **सुश्री पल्लवी बन्दोलिया** –(मो. नं. 8979140501, ई-मेल–kotiyalpallu29@gmail.com)
ग्रन्थालयपरिचारिकारूपेण 14.06.2016 तमे दिनाङ्के कार्यभारं गृहीतवान्।

४. **पङ्कजजोशी** –(मो. नं. 7895839274 , ई-मेल–joshipankaj281@gmail.com)
एम.टी.एस-रूपेण 14.06.2016 तमे दिनाङ्के कार्यभारं गृहीतवान्।

५. **द्वारिकाप्रसादः**–(मो. नं. 9927496546, ई-मेल–dwarikapainuly@gmail.com)
एम.टी.एस-रूपेण 14.06.2016 तमे दिनाङ्के कार्यभारं गृहीतवान्।

६. **नवीनसिंहकोटियालः** –(मो. नं. 9997655272, ई-मेल–nkotiyal98@gmail.com)
एम.टी.एस-रूपेण 14.06.2016 तमे दिनाङ्के कार्यभारं गृहीतवान्।

## संविधानदिवसोत्सवः समायोजितः


संविधाननिर्माता
डॉ. बी.आर. अम्बेडकरः

२५.११.२०१६ तमे दिनाङ्के श्रीरघुनाथकीर्तिपरिसरे संविधानदिवसोत्सवः समायोजितोऽभूत्। अस्माकं संविधाननिर्मातृसमितेः डा. भीमरावअम्बेडकरप्रमुखानां मान्यानां कृते कार्तज्ञभावः सर्वैः प्रकटितः। विशेषेण अत्र डा. अम्बेडकरेण भारतीयसंविधानस्य निर्माणे कृतस्य श्रमस्य चर्चा जाता। संविधानस्य कारणेनैव भारतस्य प्रत्येकं नागरिकः स्वतन्त्रतया जीवितुं शक्नोति इति सभायाः कश्चन विशेष एव स्वरः आसीत्। अशेषे भारतवर्षे संविधानमनुसृत्य सर्वैः सद्भाव-सौहार्दपूर्वकं सर्वेषु क्षेत्रेषु विकासार्थं प्रयतितव्यमिति प्राचार्येण प्रो. सुब्बरायुडुमहोदयेन स्वीये आध्यक्ष्यीयभाषणे उक्तम्। प्राध्यापकाः अपि संविधानपक्षमङ्गीकृत्य छात्राणां समक्षम् एतद्विषयिणीं व्याख्यानवार्तां प्रास्तुवन्। परिसरच्छात्रैरपि अहमहमिकयाऽत्र सोत्साहं भागः गृहीतः। अन्ते च संविधानसमाराधनाय सर्वैः प्रतिज्ञाः विहिताः।

## स्वच्छतादिवसः समनुष्ठितः

"स्वच्छं, अच्छं करणीयम्" इत्युद्घोषैः सह श्रीरघुनाथकीर्तिपरिसरे सर्वे प्राध्यापकाः, छात्राः, कर्मचारिणश्च स्वविस्तृतपरिसरभूपटले स्वच्छताकार्यं कृतवन्तः ०२ अक्टूबर, २०१६ दिनाङ्के। अस्मिन् कार्यक्रमे पर्यावरणस्य विशुद्ध्यर्थं सर्वत्रैव स्वच्छीकरणम् आवश्यकमिति विषये विद्यावन्तः प्राध्यापकाः, छात्राश्च स्व-स्वाभिमतभाषणं स्फुटीकृतवन्तः। अस्मिन् प्रसङ्गे प्राचार्यः प्रो. के.बी. सुब्बरायुडुः मानवसभ्यतायां स्वच्छतामहत्त्वं सविस्तरं व्याख्यायितवान्। स्वच्छताकार्यं कुर्वन्तः सर्वे परिसरपरिजनाः महदुत्साहपुरस्सरं स्वच्छतादिवसं समनुष्ठितवन्तः।


स्वच्छतादिवसावसरे परिसरस्य स्वच्छतां कुर्वन्तः छात्राः अध्यापकाश्च

# परिसरीय-विभागानां परिचयः

## व्याकरणविभागः–

1. **प्रो. बनमालीबिश्वालः–** (मो. नं.–9450781742, ई-मेल–banamali7@gmail.com)
   प्रयागस्थ-गङ्गानाथ झा-परिसरात् स्थानान्तरितः सन् 17.06.2016 तमे दिनाङ्के व्याकरणविभागे कार्यभारं गृहीतवान्।
2. **श्री श्रीओमशर्मा–** (मो. नं. 8899187929, ई-मेल–shriomsharma2012@gmail.com)
   अतिथिप्राध्यापकरूपेण 08.07.2016 तमे दिनाङ्के कार्यभारं गृहीतवान्।

## साहित्यविभागः–

१. **डा. प्रफुल्लगडपालः–** (मो. नं. 9891400817, ई-मेल–prafullgadpal@gmail.com)
   नवदेहलीस्थ-राष्ट्रियसंस्कृतसंस्थानात् स्थानान्तरितः सन् 22.06.2016 तमे दिनाङ्के परिसरेऽस्मिन् कार्यभारं गृहीतवान्।

२. **डा. शैलेन्द्रनारायणकोटियालः–** (मो. नं. 9412949976, ई-मेल–drsnkotiyal1962@gmail.com)

३. **डा. सुशीलप्रसादः–** (मो. नं. 9411134213, ई-मेल– susheelbedoni74@gmail.com)

४. **डा. मनीषजुगरानः–** (मो. नं. 9630234237, ई-मेल samskritmanish@gmail.com)
   अतिथि-प्राध्यापकरूपेण भोपाल-परिसरात् स्थानान्तरितः सन् 22.06.2016 तमे दिनाङ्के कार्यभारं गृहीतवान्।

## न्यायविभागः–

१. **डा. आर. बालमुरुगन्–** (मो नं. 9497669576, ई-मेल–balamuraganr202@gmail.com)
   गुरुवायुरपरिसरात् स्थानान्तरितः 30.6.2016 सन् तमे दिनाङ्के कार्यभारं गृहीतवान्।

## ज्यौतिषविभागः–

१. **डा. मुकेशकुमारः–** (मो. नं. 9459522200, ई-मेल–mukesh09.bharti@gmail.com)
   13.7.2016 तमे दिनाङ्के कार्यभारं गृहीतवान्।

२. **डा. सुरेशशर्मा–** (मो. नं. 9459821650, ई-मेल–acharya.suresh177@gmail.com)
   अतिथिप्राध्यापकरूपेण 24.10.2016 तमे दिनाङ्के कार्यभारं गृहीतवान्।

## वेदविभागः–

१. **डा. शैलेन्द्रप्रसादउनियालः–** (मो. नं. ९७१८७११६३७, ई-मेल– shalendraprasaduniyal@gmail.com)
   27 जून, 2016 दिनाङ्के परिसरऽस्मिने् कार्यभारं स्वीकृतवान्।

## आधुनिकविभागः–

१. **डा. अरविन्दसिंहगौरः–** (मो. नं. 7055391231, ई-मेल–gaurarvind4096@gmail.com)
   अतिथिप्राध्यापकरूपेण गुरुवायूर-परिसरात् स्थानान्तरितः १८.०७.२०१६ तमे दिनाङ्के कार्यभारं गृहीतवान्।

२. **डा. निपुणचौधरी–** (मो. नं. 9782359242, ई-मेल–nipun085@gmail.com)
   24.10.2016 अतिथिप्राध्यापकरूपेण, आंग्लविभागे कार्यभारं गृहीतवान्।

३. **डा. वीरेन्द्रसिंहबर्त्वालः–** (मो. नं. 9411341443, ई-मेल–veenrendra.bartwal@gmail.com)
   अतिथिप्राध्यापकरूपेण हिन्दीविभागे 06.10.2016 तमे दिनाङ्के कार्यभारं गृहीतवान्।

४. **श्रीपङ्कजकोटियालः–** (मो. नं. 7579466081, ई-मेल–kotiyalp@gmail.com)
   अतिथिप्राध्यापकरूपेण सङ्गणकविज्ञानविषये 17.10.2016 तमे दिनाङ्के कार्यभारं गृहीतवान्।

५. **श्रीसन्दीपसिंहरावतः–** (मो. नं. 8755039227, ई-मेल–sendeeprawat547@gmail.com)
   अतिथिप्राध्यापकरूपेण ०१.११.२०१६ तमे दिनाङ्के कार्यभारं गृहीतवान्।

**३. डा. शैलेन्द्रनारायणकोटियालः –** डा. शैलेन्द्रनारायणकोटियालः उत्तराखण्डसर्वकारेण संस्कृताकादम्या समुन्नत्यै गठितायाः "उच्चस्तरीयपरामर्शदातृसमितेः" प्रथमोपवेशनं द्रोणनगरे (देहरादूने) सचिवालये समाहूते उपवेशने १२.०१.२०१७ दिनाङ्के समितिसदस्यत्वेन भागग्रहणम् अकरोत्।

**४. डा. अरविन्दगौरः–**देवप्रयागस्थ-श्रीरघुनाथकीर्तिपरिसरे आधुनिकविषयविभागान्तर्गतम् इतिहासविषयस्य सहायकाचार्यः (संविदा) डा. अरविन्दसिंहगौरः देहरादूनस्थे-डी.ए.वी. स्नातकोत्तर-महाविद्यालये १८-१९ नवम्बर, २०१६ इत्यवधौ "पर्यावरणीय आचार – मानव-प्रकृति के सम्बन्ध में" इत्यस्मिन् विषये आयोजितायां राष्ट्रिय-सङ्गोष्ठ्यां "वेदों में पर्यावरण शिक्षा : एक अवधारणा" इति विषयमधिकृत्य शोधपत्रं प्रास्तौत्।

**५. डा. वीरेन्द्रसिंहबर्त्वालः–**राष्ट्रियसंस्कृतसंस्थानस्य देवप्रयागस्थिते श्रीरघुनाथकीर्तिपरिसरे कार्यरतस्य हिन्दीप्राध्यापकस्य (संविदा) डा. वीरेन्द्रसिंहबर्त्वालस्य 'गढ़वाली भाषा-प्रकृतिसमृद्धि" इति ग्रन्थः ०९.११.२०१६ तमे दिनाङ्के 'सोशल बलूनी पब्लिक स्कूल' देहरादूननगरे श्रीरघुनाथकीर्ति-परिसरस्य प्राचार्यस्य प्रो. के.बी. सुब्बरायुडुमहोदयस्य मुख्यातिथित्वेन लोकार्पितः।

**६. डा. मुकेशकुमारः–**राष्ट्रियसंस्कृतसंस्थानेन अगरतलायां विद्यमाने एकलव्यपरिसरे समायोजिते नवमे अन्तःपरिसरीय युवमहोत्सवे श्रीरघुनाथकीर्तिपरिसरस्य छात्र मार्गदर्शकत्वेन दायित्वं निर्व्यूढम्। राष्ट्रियसंस्कृतसंस्थानस्य मुक्तस्वाध्यायपीठेन १५.१२.२०१६ तः २१.१२.२०१६ पर्यन्तं मुम्बईस्थे क.जे. सोमैयापरिसरे समायोजितायां सप्तदिवसीयायां पाठलेखनकार्यशालायां भागमगृह्णात्। २२.१२.२०१६ तः २४.१२.२०१६ पर्यन्तं तस्मिन्नेव परिसरे मुक्तस्वाध्यायपीठपक्षतः आयोजिते दूरस्थशिक्षाप्रशिक्षणकार्यक्रमे अपि अनेन भागः गृहीतः।

**७. डा. मनीषजुगरानः–**अगरतलायां विद्यमाने एकलव्यपरिसरे राष्ट्रियसंस्कृसंस्थानेन समायोजिते नवमे अन्तःपरिसरीययुवमहोत्सवे श्रीरघुनाथकीर्तिपरिसरस्य छात्र-मार्गदर्शकत्वेन दायित्वं निर्व्यूढम्। राष्ट्रियसंस्कृतसंस्थानेन हरिद्वारे श्रीभगवानदास-आदर्शसंस्कृतमहाविद्यालये नवम्बरमासे आयोजितायां प्रदेशस्तरीयशास्त्रीयस्पर्धायां दायित्वं निर्व्यूढम्। २४ दिसम्बरः २ जनवरीपर्यन्तं जम्मूप्रदेशस्य-श्रीरणवीरपरिसरे राष्ट्रियसंस्कृतसंस्थानस्य केन्द्रीयविद्यालयसंघटनस्य च संयुक्ततत्त्वावधाने आयोजिते केन्द्रीयविद्यालयाध्यापकानां प्रशिक्षणवर्गे प्रशिक्षकत्वेन भागम् अग्रहीत्। जूनमासे राष्ट्रियसंस्कृतसंस्थानस्य विद्यावारिधिः (पीएच. डी.) इत्युपाधिर्लब्धः।

**८. डा. शैलेन्द्रप्रसादउनियालः –** राष्ट्रियसंस्कृतसंस्थानस्य श्रीरघुनाथकीर्तिपरिसरे वेदविभागे सहायकाचार्येणानेन (संविदा) रणबीरपरिसरे जम्मूप्रदेशे वेदविभागेन समायोजितायां द्विदिवसीयायां राष्ट्रियसंगोष्ठ्यां २०७४ वैक्रमाब्दे सोम्यमार्गशीर्षमासस्य चतुर्थीपञ्चम्योः तिथ्योः "साम्प्रतिके काले वेदानामुपादेयता" इति विषयं समालम्ब्य शोधपत्रं प्रस्तुतम्।

**९. श्रीओमशर्मा–**भोपालपरिसरस्य व्याकरणविभागीयसङ्गोष्ठ्यां "सिद्धान्तरत्नाकरे प्रातिपदिकार्थविमर्शः" इति विषयः समुपस्थापितः। भोपालपरिसरीयायां "शास्त्रमीमांसा" इति शोधपत्रिकायां "श्रीपतञ्जलेः सन्दर्भे युधिष्ठिरमीमांसकस्य मतानुशीलनम्" इति शोधपत्रं प्रकाशितम्। उत्तराखण्डस्य "नैवेद्य" इति प्रसिद्धहिन्दीपत्रिकायाम् अस्य "दुःख निवृत्ति के उपाय" इति आलेखः प्रकाशितः।

# परिसरविदुषां शैक्षणिकोपलब्धयः गतिविधयश्च
## (जुलाई, २०१६ तः दिसम्बर, २०१६ पर्यन्तम्)

**१. प्रो. बनमालीबिश्वालः**–२३.७.२०१६ तमे दिनाङ्के उत्तरप्रदेशस्य माननीय-मुख्यमन्त्रिभिः उत्तरप्रदेश-संस्कृत-संस्थानस्य विशिष्टपुरस्कारेण सम्मानितः। अक्टूबर (२०१६) मासे उत्तरप्रदेश-संस्कृतसंस्थानस्य विविधपुरस्कारैः त्रीणि पुस्तकानि (पत्रालयः, जन्मान्धस्य स्वप्नः तथा जगन्नाथसुभाषितञ्च) पुरस्कृतानि सन्ति इति घोषणा अभवत्। २२.१०.१६ तः २७.१०.२०१६ दिनाङ्क यावत् सावित्रीबाई-फूले-पुणे-विश्वविद्यालये Thematic Lecture Series इति योजनान्तर्गतम् आधुनिकसंस्कृतसाहित्यस्य (गद्य-पद्य-नाट्य-विधानां) परिवर्तितं परिदृश्यम् इति विषयम् अधिकृत्य षड् व्याख्यानानि प्रदत्तानि। १७.०९.२०१६ तमे दिनाङ्के उत्कल-विश्वविद्यालये पुनश्चर्यापाठ्यक्रमे आधुनिक-संस्कृतसाहित्ये नवीनाः प्रवृत्तयः इति विषयम् अधिकृत्य व्याख्यानद्वयं प्रदत्तम्। ०६.०८.२०१६ तमे दिनाङ्के नवदेहलीस्थ-केन्द्रीय-साहित्य-अकादम्या मणिपुर-राज्ये इम्फालनगरे आयोजिते अभिव्यक्त्याख्ये अखिलभारतीय-बहुभाषीय-काव्यपाठ-कार्यक्रमे संस्कृत-हिन्दी-आङ्ग्ल-भाषासु कवितापाठः। ०९.०९.२०१६ तमे दिनाङ्के पाण्डीचेरिस्थया संस्कृत-बालसाहित्यपरिषदा नवदेहलीस्थे अरविन्दाश्रमे आयोजिते अखिलभारतीयबालकवितापाठोत्सवे संस्कृत-बाल-कवितापाठः विहितः। २०.११.२०१६ तमे दिनाङ्के उत्कलप्रदेशे बालेश्वरजिलान्तर्गते जागेश्वरपदास्थे भगवान्-चन्द्र-संस्कृत-महाविद्यालये समासवृत्तिः इति विषयमधिकृत्य आयोजितायां राष्ट्रीयसङ्गोष्ठ्यां सम्पूर्ति-सत्रे च अध्यक्षता कृता। ११.०९.२०१६ तमे दिनाङ्के पाण्डीचेरिस्थया संस्कृत-बालसाहित्य-परिषदा नवदेहलीस्थे अरविन्दाश्रमे संस्कृते बालसाहित्यम् इति विषयमधिकृत्य आयोजितायां राष्ट्रीय-सङ्गोष्ठ्यामेकस्मिन् विशिष्टे सत्रे अध्यक्षता कृता। सङ्गोष्ठ्यामेकस्मिन् विशिष्टे सत्रे तथा २१.०६.२०१६ तः २७.०६.२०१६ दिनाङ्कं यावत् योगसप्ताहावसरे साबित्रीबाई-फूले-पुणे-विश्वविद्यालये आयोजितायां योगदर्शन-कार्यशालायाम् आधारपुरुषरूपेण उद्बोधितवान्। १०.०९.२०१६ तमे दिनाङ्के पाण्डीचेरिस्थया संस्कृत-बालसाहित्य-परिषदा नवदेहलीस्थे अरविन्दाश्रमे संस्कृते बालसाहित्यम् इति विषयमधिकृत्य आयोजितायां राष्ट्रिय-सङ्गोष्ठ्यामेकस्मिन् सत्रे केशवचन्द्रदाशस्य गद्यात्मकं बालसाहित्यम् इति विषयमधिकृत्य शोधपत्रं प्रस्तुतम्। १४.०९.२०१६ तमे दिनाङ्के गुजरात-राज्यस्य अहमदाबादनगरे Abhinavagupta : A re-reading इति विषयमधिकृत्य आयोजितायां राष्ट्रिय-सङ्गोष्ठ्यामेकस्मिन् सत्रे 'Abhinavagupta as an Aesthetician' इति विषयमधिकृत्य शोधपत्रं प्रस्तुतम्। १३.११.२०१६ तमे दिनाङ्के हरिद्वारस्थे उत्तराखण्ड-संस्कृत-विश्वविद्यालये आयोजिते ४८ तमे अखिलभारतीय-प्राच्यविद्या-सम्मेलने समकालिकं संस्कृतबालसाहित्यम् इति विषयमधिकृत्य शोधपत्रं प्रस्तुतम्। १९.११.२०१६ तमे दिनाङ्के उत्कल प्रदेशे बालेश्वरजिलान्तर्गते जागेश्वरपदास्थे भगवान-चन्द्र-संस्कृत-महाविद्यालये समासवृत्तिः इति विषयमधिकृत्य आयोजितायां राष्ट्रीय-सङ्गोष्ठ्यां "समासशक्तिसिद्धान्तस्य ऐतिहासिकः क्रमविकासः" इति विषयमधिकृत्य शोधपत्रं प्रस्तुतम्। ४-५.११.१६ दिनाङ्कयोः राष्ट्रिय-संस्कृत-संस्थानेनायोजित-राज्यस्तरीयस्पर्धान्तर्गतं हरिद्वारस्थे भगवान्दास-आदर्श-संस्कृत-महाविद्यालये आयोजितायाम् उत्तराखण्ड-राज्यस्तरीयस्पर्धायां शास्त्रीयभाषण-शलाका-समस्यापूर्त्यादिषु पञ्च-प्रतियोगितासु निर्णायकदायित्वं निर्व्यूढम्। उज्जयिन्याः वेदविद्या-प्रतिष्ठानस्य वैदिकपरीक्षायां निरीक्षकदायित्वं निर्व्यूढम्। विविध-विश्वविद्यालयानां त्रयाणां शोधप्रबन्धानां बाह्यपरीक्षकीय-दायित्वं निर्व्यूढम्। १७.०९.२०१६ तमे दिनाङ्के उत्कल-विश्वविद्यालये एकस्य शोधच्छात्रस्य वाक्-परीक्षा अपि गृहीता। जून- २०१६ तः दिसम्बर २०१६ यावद् दृक्-पत्रिकायाः ३०-३१ अङ्कयोः सम्पादनं कृतम्। कथासरित्-पत्रिकायाः २२ तमस्य अङ्कस्य सम्पादनं कृतम्। पद्यबन्धायाः नवमाङ्कस्य मुख्य-सम्पादकीय-दायित्वं निर्व्यूढम्।

**२. डा. प्रफुल्लगडपालः**–महाराष्ट्रस्थे चन्द्रपुरे भारतीयबौद्धमहासभा-पालिसंवर्धनप्रतिष्ठानयोः संयुक्ततत्त्वावधानेन समायोजिते "पालि-प्रशिक्षण-अध्ययनशाला" इत्यस्मिन् कार्यक्रमे परिसरस्यास्य सहायकाचार्येण डा. प्रफुल्लगडपालेन ०४.१०.२०१६ तः १४.१०.२०१६ पर्यन्तम् आधारपुरुषत्वेन प्रशिक्षणं प्रदत्तम्। अत्र पालिव्याकरणविषये बौद्धसाहित्यविषये च सप्त व्याख्यानैः सह अनेन पालिभाषायाः व्यवहारिकं प्रशिक्षणमपि प्रदत्तम्। अन्ताराष्ट्रियायाः शोधपत्रिकायाः 'देवभूमिसौरभम्' अपि च अन्ताराष्ट्रियशोधपत्रिकायाः 'धम्म-सन्देश' इत्येतयोः सम्पादनकार्ये योगदानं विहितम्।

# प्राचार्यस्य दैनन्दिनी

| | |
|---|---|
| ११.०८.२०१६ | राष्ट्रियसंस्कृतसंस्थानस्य देवप्रयागस्थ-श्रीरघुनाथकीर्तिपरिसरे प्राचार्यपदग्रहणं कृतम्। |
| १५.०८.२०१६ | स्वतन्त्रतादिवसकार्यक्रमे ध्वजारोहणम्, कार्यक्रमे च आध्यक्षीयमुद्बोधनं कृतम्। |
| १६-१८.०८.२०१६ | कृष्णानद्याः पुष्करतटसमीपे विजयवाडानगरे भगवद्गीतासम्मेलने भागग्रहणम्। |
| २०.८.२०१६ | बासरनगरस्य महर्षिसान्दीपनी-वेदगुरुकुलपाठशालायाः सचिवेन श्रीदेवीप्रसादत्रिपाठिना सह निरीक्षणं विहितम्। |
| २४.८.२०१६ | देवप्रयागस्थ-श्रीरघुनाथकीर्तिपरिसरे संस्कृतसप्ताहसम्पूर्तिकार्यक्रमे आध्यक्ष्यं निर्व्यूढम्। |
| २५.८.२०१६ | देवप्रयागस्थ-श्रीरघुनाथकीर्तिपरिसरस्य विभिन्नसमितीनां गठनसम्बद्धे उपवेशने आध्यक्ष्यं निर्व्यूढम्। |
| ०२.०९.२०१६ | हिमाचलप्रदेशस्य बलाहारनगरे वेदव्यासपरिसरे चयनसमित्याः उपवेशने भागग्रहणम्। |
| १४.९.२०१६ | देवप्रयागस्थ-श्रीरघुनाथकीर्तिपरिसरे हिन्दीपक्षोत्सवस्य उद्घाटनकार्यक्रमे आध्यक्ष्यं विहितम्। |
| २७.९.२०१६ | हरिद्वारस्थ-उत्तराखण्डसंस्कृतविश्वविद्यालये हिन्दीपक्षोत्सवस्य सम्पूर्तिकार्यक्रमे आध्यक्ष्यं विहितम्। |
| २८.९.२०१६ | देवप्रयागस्थ-श्रीरघुनाथकीर्तिपरिसरे हिन्दीपक्षोत्सवस्य समापनकार्यक्रमे अध्यक्षता विहिता। |
| २१.१०.२०१६ | ज्योतिषव्याख्यानमालायाः समारम्भे देवप्रयागस्थ-श्रीरघुनाथकीर्तिपरिसरे अध्यक्षीयं भाषणं कृतम्। |
| ३१.१०.२०१६ | देवप्रयागस्थ-श्रीरघुनाथकीर्तिपरिसरे सतर्कताजागरुकतासप्ताहस्य राष्ट्रिय-एकता-सप्ताहस्य च उद्घाटने अध्यक्षता विहिता। |
| ०५.११.२०१६ | देवप्रयागस्थ-श्रीरघुनाथकीर्तिपरिसरेण समायोजिते सर्तकता-एवं-जागरुकतासप्ताहस्य सम्पूर्त्तिकार्यक्रमे आध्यक्ष्यं विहितम्। |
| ०६.११.२०१६ | देवप्रयागस्थ-श्रीरघुनाथकीर्तिपरिसरे राष्ट्रिय-एकता-सप्ताहस्य सम्पूर्तिसमारोहे अध्यक्षता सम्पादिता। |
| १०.११.२०१६ | नवदेहलीस्थ-राष्ट्रियसंस्कृतसंस्थाने प्रबन्धपरिषदः उपवेशने भागग्रहणम्। |
| १२.११.२०१६ | देवप्रयागस्थ-श्रीरघुनाथकीर्तिपरिसरस्य भवनादिनिर्माणकार्यारम्भसमबद्धे भूमिपूजनोत्सवे अध्यक्षता विहिता। |
| १३.११.२०१६ | हरिद्वारस्थ-उत्तराखण्डसंस्कृतविश्वविद्यालयेन समायोजिते अखिल-भारतीय-प्राच्यविद्यासम्मेलने भागग्रहणम्। |
| १४.११.२०१६ | बालदिवसे देवप्रयागस्थ-सरस्वतीविद्यामन्दिरे मुख्यातिथिरूपेण उद्बोधनम्। |
| १७.११.२०१६ | अगरतलास्थ-एकलव्यपरिसरेण आयोजिते युवमहोत्सवे श्रीरघुनाथकीर्तिपरिसरपक्षतः प्रतिभागिच्छात्रैः प्राध्यापकैश्च सह प्राचार्यत्वेन भागग्रहणम्। |
| २०.११.२०१६ | परिसरप्राचार्याणाम् उपवेशने अगरतलायां श्रीरघुनाथकीर्तिपरिसरपक्षतः प्रतिनिधित्वं विहितम्। |
| २१.११.२०१६ | देवप्रयागस्थ-श्रीरघुनाथकीर्तिपरिसरे आगामियुवमहोत्सवस्य (२०१७) आयोजनार्थं ध्वजग्रहणम्। |
| २०.१२.२०१६ | देवप्रयागस्थ-श्रीरघुनाथमन्दिरप्राङ्गणे स्वतन्त्रतासङ्ग्रामसेनानिश्रीकृष्णकान्तटोडरियाबालिकाविद्यालयस्योद्घाटने विशिष्टातिथिरूपेण भागग्रहणम्। |
| २०.१२.२०१६ | देवप्रयागस्थ-जलनिगमभवनस्य उद्घाटनसमारोहे भागग्रहणम्। |

## भविष्यन्ति राष्ट्रियसङ्गोष्ठयः

राष्ट्रियसंस्कृतसंस्थानस्याङ्गभूते देवप्रयागस्थे श्रीरघुनाथकीर्तिपरिसरे विविध-विभागीया द्विदिवसीया राष्ट्रियसङ्गोष्ठयः २३.०१.२०१७ तः ३१.०१.२०१७ दिनाङ्कं यावद् आयोज्यन्ते। तत्क्रमे निम्नाङ्किताः सङ्गोष्ठयः समायोजयिष्यन्ते–

१. **व्याकरणविभागीया द्विदिवसीया राष्ट्रिया सङ्गोष्ठी**–व्याकरणविभागीया द्विदिवसीया राष्ट्रिया सङ्गोष्ठी २३.०१.२०१७ तः २४.०१.२०१७ दिनाङ्कं यावत् सङ्कल्पिता। सङ्गोष्ठ्याः केन्द्रीयो विषयो वर्तते –"महाभाष्यस्य लौकिकालौकिकोपयोगित्वम्।"

२. **साहित्य-विभागीया द्विदिवसीया राष्ट्रिया सङ्गोष्ठी**–साहित्यविभागीया द्विदिवसीया राष्ट्रिया सङ्गोष्ठी २४.०१.२०१७ तः २५.०१.२०१७ दिनाङ्कं यावत् सङ्कल्पिता। सङ्गोष्ठ्याः मुख्यो विषयोऽस्ति–"संस्कृते अनूदितं लघुकथासाहित्यम्।"

३. **ज्योतिषविभागीया द्विदिवसीया राष्ट्रियसङ्गोष्ठी**–ज्योतिषविभागीया द्विदिवसीया राष्ट्रियसङ्गोष्ठी २७.०१.२०१७ तः २८.०१.२०१७ दिनाङ्कं यावत् सुनिश्चिता। तत्र च प्रमुखविषयो वर्तते–"गोलविमर्शः।"

४. **वेदविभागीया द्विदिवसीया राष्ट्रिया सङ्गोष्ठी**–वेदविभागीया द्विदिवसीया राष्ट्रिया सङ्गोष्ठी २८.०१.२०१७ तः २९.०१.२०१७ दिनाङ्कं यावत् सङ्कल्पिता। सङ्गोष्ठ्याः केन्द्रीयो विषयो वर्तते–"वेदेषु राष्ट्रचेतना।"

५. **आधुनिकविभागीया द्विदिवसीया राष्ट्रिया सङ्गोष्ठी**–आधुनिकविभागीया द्विदिवसीया राष्ट्रिया सङ्गोष्ठी २९.०१.२०१७ तः ३०.०१.२०१७ दिनाङ्कं यावत् सङ्कल्पिता। सङ्गोष्ठ्याः प्रधान-विषयो वर्तते–"आधुनिक विषयों का संस्कृत के साथ अन्तःसम्बन्ध।"

६. **न्यायविभागीया द्विदिवसीया राष्ट्रियसङ्गोष्ठी**–न्यायविभागीया द्विदिवसीया राष्ट्रियसङ्गोष्ठी २७.०१.२०१७ तः २८.०१.२०१७ दिनाङ्कं यावत् सङ्कल्पिता। तत्र च मुख्यो विषयो वर्तते–"न्यायशास्त्रस्य शास्त्रान्तरेषु प्रभावः।"

## समायोक्ष्यन्ते विशिष्टव्याख्यानमालाः

राष्ट्रियसंस्कृतसंस्थानस्याङ्गभूते देवप्रयागस्थे श्रीरघुनाथकीर्तिपरिसरे विविधविभागीया विशिष्टव्याख्यानमाला २३.१.१७ तः३१.१.१७ दिनाङ्कं यावत् सम्पत्स्यन्ते। एतत्क्रमे इमाः विशिष्टव्याख्यानमालाः समायोजयिष्यन्ते–

१. **व्याकरणविभागीया विशिष्टव्याख्यानमाला**–सर्वप्रथमं व्याकरणविभागीया विशिष्ट-व्याख्यानमाला २३.०१.२०१७ तमे दिनाङ्के ११ वादने सम्पत्स्यते। अत्र व्याख्यान-विषयः–"पतञ्जलिसम्मतं शब्दस्वरूपम्।" मुख्यवक्ता–प्रो. रमेशचन्द्रपण्डा-महोदयः (कुलपतिः, उज्जयिनीस्थ-महर्षिपाणिनिसंस्कृतविश्वविद्यालयः)।

२. **साहित्यविभागीया विशिष्टव्याख्यानमाला**–साहित्यविभागीया विशिष्टव्याख्यानमाला २४.०१.२०१७ तमे दिनाङ्के ३.०० वादने सम्पत्स्यते। अत्र व्याख्यानविषयः– "समकालिकसंस्कृतसाहित्यस्य नवीनाः प्रवृत्तयः।" मुख्यवक्ता - प्रो. अभिराजराजेन्द्रमिश्रमहोदयः (पूर्वकुलपतिः, वाराणसीस्थ-सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः)।

३. **ज्योतिषविभागीया विशिष्टव्याख्यानमाला**–ज्योतिष-विभागीया विशिष्ट-व्याख्यानमाला २७.०१.२०१७ तमे दिनाङ्के ११.३० वादने सम्पत्स्यते। अत्र व्याख्यानविषयः–"व्रतपर्वसु मुहूर्तविमर्शः।" मुख्यवक्ता–प्रो. हंसधरझाः (आचार्यः, ज्योतिषविभागः, रा.सं.सं., भोपाल-परिसरः)

४. **वेदविभागीया विशिष्टव्याख्यानमाला**–वेदविभागीया विशिष्टव्याख्यानमाला २८.०१.२०१७ तमे दिनाङ्के ३.०० वादने सम्पत्स्यते। अत्र व्याख्यान-विषयः–"वैदिकविज्ञानप्रकृतिः।" मुख्यवक्ता–प्रो. मनोजकुमारमिश्रः (नवदेहलीस्थ-राष्ट्रियसंस्कृतसंस्थानस्य वेदविभागाध्यक्षः)

५. **आधुनिकविभागीया विशिष्टव्याख्यानमाला**–आधुनिकविभागीया विशिष्टव्याख्यानमाला २९.०१.२०१७ तमे दिनाङ्के ३.०० वादने सम्पत्स्यते। अत्र व्याख्यानविषयः–"ऐतिहासिक स्रोत के रूप में संस्कृत साहित्य।" मुख्यवक्ता–डा. अजयपरमारः (विभागाध्यक्षः इतिहास-संस्कृति-पुरातत्त्वविभागः, उत्तराखण्डसंस्कृतविश्वविद्यालयः, हरिद्वारम्)

६. **न्यायविभागीया विशिष्टव्याख्यानमाला**–न्यायविभागीया विशिष्टव्याख्यानमाला ३०.०१.२०१७ तमे दिनाङ्के ३.०० वादने सम्पत्स्यते। व्याख्यान-विषयः–"न्यायशास्त्रे प्रमाणविचारः।" मुख्यवक्ता–प्रो. पीयूषकान्तदीक्षितः (कुलपतिः, उत्तराखण्ड-संस्कृतविश्वविद्यालयः, हरिद्वारम्)

एतत्सर्वमपि विषयं मनसि निधाय अस्मिन् विषये त्रिदिवसीया राष्ट्रिया सङ्गोष्ठी प्रस्ताविता वर्तते यस्याम् उद्घाटनं, उद्यापनसत्रं च मेलयित्वा आहत्य १० सत्राणि भविष्यन्ति। सङ्गोष्ठ्याः सत्रविवरणम् इत्थं वर्तते -

१. उद्घाटनसत्रम् ८.३.१७ तमे दिनाङ्के पूर्वाह्णे १० वादने

३. उत्तराखण्ड-गद्यसाहित्यवैभवम्

४. उत्तराखण्ड-नाट्यसाहित्यवैभवम्

**शास्त्र-वैभवसत्रम्**

५. उत्तराखण्ड-काव्यशास्त्रवैभवम्

६. उत्तराखण्ड-व्याकरण-भाषाशास्त्रवैभवम्

७. उत्तराखण्ड-ज्योतिष-वास्तुशास्त्रवैभवम्

८. उत्तराखण्ड-दर्शनशास्त्रवैभवम्

९. उत्तराखण्ड-वेद- आयुर्वेद-धार्मशास्त्रवैभवम्

१०. उद्यापनसत्रम् (१०.३.१७)

साहित्य-वैभवसत्रम् ८.३.१७. तमे दिनाङ्के

२. उत्तराखण्ड-पद्यसाहित्यवैभवम् ( महाकाव्य-लघुकाव्य-पुस्तककाण्य-गीत-गजलकाण्यानि)

३. उत्तराखण्ड-गद्यसाहित्यवैभवम् (कथा-उपन्यास-ललित-निबन्ध-भ्रमणसाहित्यादीनि)

४. उत्तराखण्ड-नाट्यसाहित्यवैभवम् (नाटक-लघुनाटक-एकांकि-विधिनाटक-नमोनाटकादीनि)

शास्त्र-वैभवसत्रम् ९.३०.१७ त: १०.३.१७. तमे दिनाङ्के यावत्

५. उत्तराखण्ड-काव्यशास्त्रवैभवम् (छन्द:शास्त्र-अलङ्कारशास्त्रादीनि)

६. उत्तराखण्ड-व्याकरण-भाषाशास्त्रवैभवम्

७. उत्तराखण्ड-ज्योतिष-वास्तुशास्त्रवैभवम्

८. उत्तराखण्ड-दर्शनशास्त्रवैभवम् (न्याय-वैशेषिक-सांख्ययोग-वेदान्त-मीमांसादीनि शास्त्राणि)

९. उत्तराखण्ड-वेद- आयुर्वेद-धर्मशास्त्रवैभवम्

१०. उद्यापनसत्रम् (१०.३.१७) तमे दिनाङ्के अपराह्ने वादने

ये च विद्वांस: शोधच्छात्राश्च सम्मेलनेऽस्मिन् भागं ग्रहीतुमिच्छन्ति ते फरवरी-मासस्य पञ्चदशदिनाङ्कं यावत् शोधपत्राणि प्रेषयितुमर्हन्ति चितेभ्य: शोधपत्र-लेखकेभ्य: भागग्रहणाय निमन्त्रण-पत्राणि प्रेषयिष्यन्ते २०.०२.१७ तमे दिनाङ्के यावत्।

## राष्ट्रिय-एकतादिवस: समायोजित:

अस्मद्देशस्य सर्वेषु अपि जनेषु ऐक्यभावनाया: विकासार्थं भारतसर्वकारेण महता उत्साहेन समग्रे देशे राष्ट्रियैकतासप्ताहाचरणं करणीयम् इति सङ्कल्पितम्। तदनुरोधेन राष्ट्रियसंस्कृतसंस्थानस्य देवप्रयागस्थे श्रीरघुनाथकीर्तिपरिसरे राष्ट्रिय-एकतासप्ताहाङ्गतया कविता-निबन्ध-उद्घोषलेखनादिस्पर्धा: समायोजिता:। ३१.१०.२०१६ त: ०६.११.२०१६ दिनाङ्कं यावत् आयोजिते अस्मिन् कार्यक्रमे विजेतार: छात्रा: पुरस्कारै: सभाजिता: अभूवन्।

अस्मिन्नवसरे विविधप्रतियोगितानां माध्यमेन छात्रै: भारतस्य ऐक्यताया: अखण्डताया: च विषये सुशोभना: भावा: भाषणकवितादिमाध्यमेन अभिव्यञ्जिता:। भारते विविधजाति-धर्म-सम्प्रदाय-भाषादिवैविध्ये सत्यपि अकल्पनीय: ऐक्यभाव: अस्ति इत्यत: "वयं भारतीया: इति गौरवमनुभवाम:" इति छात्राणां हृत्कमलस्पन्दा: प्रस्फुटिता: अभूवन्।

एतासु स्पर्धासु कवितालेखने प्राक्शास्त्रिप्रथमवर्षस्य छात्र: हिमांशुडोभाल: प्रथमपुरस्कारम्, अस्या: एव कक्ष्याया: भुवनेशभट्ट: द्वितीयपुरस्कारम्, शास्त्रिप्रथमवर्षस्य छात्र: कमलकिशोरश्च तृतीयं पुरस्कारम् अवाप्नोत्। निबन्धलेखनस्पर्धायां शास्त्रिप्रथमवर्षीय: छात्र: धनेशकोटियाल: प्रथमं, मनीषगौड: द्वितीयं नकुलश्च तृतीयं पुरस्कारमवाप्नोत्। उद्घोषरचनायां प्राक्शास्त्रिप्रथमवर्षीय: भुवनेशभट्ट: प्रथमपुरस्कारं, नवीनकैरवान: द्वितीयं, हिमांशुडोभालश्च तृतीयं पुरस्कारम् अलभत।

समापनकार्यक्रमे मुख्यातिथिरूपेण समागत: उत्तराखण्डराज्यस्य पूर्वकैबिनेटमन्त्री मोहनसिंहरावत "गांववासी" एतान् छात्रान् पुरस्कारप्रदानेन प्रोत्साहितवान्। स्वकीयमुख्यातिथिभाषणे गांववासिमहोदय: भारतस्य सांस्कृतिकैक्यताया: महत्त्वमपि अवर्णयत्। तेन निरूपितं यद् भारतस्य संस्कृति: समग्रे विश्वे प्रसिद्धा सुप्रतिष्ठिता च वर्तते। भारतं विश्वगुरु: आसीत् विश्वगुरुश्च स्थास्यति। भारतस्य ऐक्यताया: अखण्डताया: च स्थापनार्थं देशस्य सर्वेषामपि नागरिकाणां दायित्वं वर्तते। अस्मिन्नवसरे परिसरस्य विद्यार्थिभि: "भारतस्य स्वतन्त्रताकाले विविधलघुराज्यानां भारते विलय:" इति विषयमधिकृत्य नाटकमपि प्रदर्शितम्।

समापनकार्यक्रमस्य अध्यक्ष: आसीत्–परिसरस्य प्राचार्य: प्रो. के.बी.सुब्बरायुडु:। तेन स्वीये अध्यक्षभाषणे "भारतस्य ऐक्यमेव अस्य शक्ति:" इति निरूपितम्। तस्य सुस्पष्ट: सन्देश: आसीद्यत् अन्ताराष्ट्रिये समुदाये भारतस्य वर्चस्वं केवलम् अस्माकम् एकताया: कारणादेव अस्ति। अस्माकं एकताया: कारणादेव कोऽपि भारतदेशोपरि दृष्टिपातमपि कर्तुं न शक्नोति। अत: एकताया: इयं भावना सर्वदा अस्माकं मनस्सु जागृता स्यात्। अस्य कार्यक्रमस्य संयोजनं डा. अरविन्दसिंहगौरेण विहितम्।

## परिसरे भविष्यति अन्ताराष्ट्रियसङ्गोष्ठी

उत्तराखण्डः देवभूमिः इति नाम्ना प्रसिद्धोऽस्ति, यत्र न केवलं प्रसिद्धेषु ज्योतिर्मठेषु अन्यतमं श्रीबद्रिकाश्रमधाम अवस्थितं विद्यते अपि तु अत्र द्वादशज्योतिर्लिङ्गेषु प्रधानभूतः श्रीकेदारनाथः अपि विराजमानः वर्तते। भारतीयसंस्कृतेः अमूल्यस्रोतस्विन्याः गङ्गायाः यमुनायाश्चापि उद्‌गमस्थली अयमेव पावनः प्रदेशः अस्ति। कालिदासस्य कुमारसम्भवे देवतात्मारूपेण वर्णितः हिमालयः अद्यापि अत्र पृथिव्याः मानदण्डस्य गौरवमयीं गाथां स्वीय-अमितप्रभया प्रकाशयन् राराजते। अत्र विद्यमानेषु पञ्चप्रयागेषु देवप्रयागः, रुद्रप्रयागः, कर्णप्रयागः नन्दप्रयागः तथा विष्णुप्रयागश्च उत्तराखण्डप्रान्तस्य धार्मिक-आध्यात्मिक-सांस्कृतिकमहत्त्वं सर्वत्र द्योतयन्ति।

प्राचीनकालादेव उत्तराखण्डस्थः देवप्रयागः विद्याक्षेत्रनाम्ना सुप्रसिद्धः। अयम् अद्वितीयः एव प्रदेशः यत्र संस्कृतं प्रदेशस्य द्वितीयराजभाषारूपेण अङ्गीकृतं वर्तते। इतिहासः प्रमाणं वर्तते यत् प्राचीनकालादेव संस्कृतमपि अस्य प्रान्तस्य राजभाषारूपेण अधिष्ठिता आसीत्। वस्तुतः अयं प्रदेशः संस्कृतभाषायाः जन्मनः विकासस्य च भूमिः आसीत्। वेदव्यासादयः महर्षयः अस्यामेव भूमौ बहूनि पुराणानि रचयामासुः। कालिदासादिभिः कविभिः अस्य प्रदेशस्य प्राकृतिकं सौन्दर्यं स्वकाव्यस्य विषयत्वेन स्वीकृतमस्ति।

उत्तराखण्डे संस्कृतस्य नैकाः महत्त्वपूर्णाः संस्थाः, विद्यालयाः महाविद्यालयाः विश्वविद्यालयाः च विद्यमानाः सन्ति। यथा-उत्तराखण्डसंस्कृतविश्वविद्यालयः (हरिद्वारम्), उत्तराखण्डसंस्कृत-अकादमी (हरिद्वारम्), भगवानदास-आदर्शसंस्कृतमहाविद्यालयः (हरिद्वारम्), देहरादूने अवस्थितस्य उत्तराखण्डविश्वविद्यालयस्य संस्कृतविभागः, राष्ट्रियसंस्कृतसंस्थानस्य (मानितविश्वविद्यालयस्य) श्रीरघुनाथकीर्तिपरिसरः नक्षत्रवेधशाला (देवप्रयागः) चेत्यादयः। अत्रत्यासु प्राचीन-नवीनसंस्थासु नैकाः दुर्लभ्याः (प्रकाशिताः अप्रकाशिताश्च) पाण्डुलिपयः अद्यापि सुरक्षिताः सन्ति।

उत्तराखण्डस्य विद्यावैभवविषये विचारयामश्चेत् अत्र काले-काले न केवलं नैके रससिद्धाः कवयः अभूवन् अपि तु नैके परिनिष्ठिताः शास्त्रकाराः अपि जनिम् अलभन्त। सर्वादौ उत्तराखण्डस्य साहित्यवैभवविषये दृष्टिपातं कर्तुं शक्नुमः। देवप्रयागस्य श्रीरघुनाथमन्दिरस्य लेखात् ज्ञायते यत् मानोदयकाव्यस्य प्रणेता उत्तराखण्डस्य यशस्वी महाकविः भरतः १६०६ शताब्द्यां उत्तराखण्डस्य संस्कृतसाहित्यं समवर्धत। कविः वामदेवाचार्यः महावैयाकरणं नागेशभट्टमाश्रित्य "नागेश" इति शीर्षकोपेतं एकम् अत्यन्तं रमणीयम् एकाङ्कीं प्रणिनाय। यत्रैकतः कुमुदानन्दः बहुगुणा "सुदर्शनोदयकाव्यम्" अरचयत् तत्रैव अपरतः हरिदत्तशर्मा (नौटियालः) "धर्मवल्लीं" व्यरचयत्। एवमेव सदानन्दडबरालेन "कीर्तिविलासकाव्यम्" नरनारायणीयं महाकाव्यं च रचितम्। हरिकृष्णेन दौर्गादत्ती, रुडोलावर्येण शतश्लोकीरघुवंशम्, प्रस्तावपुष्पाञ्जलिः, स्तवनस्तबकावलिः च, उर्वीदत्तशास्त्रिणा एडवर्डवंशम्, बालकृष्णभट्टशास्त्रिणा कनकवंशम् "स्वतन्त्रभारतम् तपोवनशतकम्" जगदम्बाशतकम् चेत्यादीनि ग्रन्थरत्नानि उद्भावितानि। एवमेव विष्णुदत्तशर्मा (नौटियालः) हरिकृष्णदुर्गादत्तरुडोला, डा. पुरुषोत्तमडोभालः, वाणीविलासडबरालः, पार्थसारथिडबरालः, मोहनलालबाबुलकरः, वाचस्पतिगैरोला तथा शशिधरशर्मादयश्च नैके कवयः नैकानि संस्कृतकाव्यानि अरचयन्।

न केवलं काव्यसाहित्यविषये अपि तु संस्कृतस्य सर्वविधानामपि विद्यानां विकासे उत्तराखण्डस्य आचार्याणां महनीयं योगदानं वर्तते। अस्मिन् एव प्रसङ्गे महाराजः कीर्तिशाहः, आचार्यः मुकुन्ददैवज्ञः, पण्डितः नरहरिशास्त्री, पं. महीधरडङ्गवालः, पं. वृन्दावनध्यानी, आचार्यः चक्रधरजोशी, पं. मुरलीधरशर्मा, आचार्यः जितेन्द्रभारतीयः, पं. बालकृष्णभट्टः, डा. शशिधरशर्मा, पं.हरिवंशशास्त्री, पं. जीवरामकोटियालः, पं. विश्वनाथभट्टः, पं. बैजरामजोशी, आचार्यः विद्याधरजोशी, पं बिहारीलालचक्रवर्ती, पं. कुशलानन्दध्यानी, पं. सत्यनारायणशास्त्री, पं. भवानीदत्तभट्टः, आचार्यः कैलाशचन्द्रध्यानी चेत्यादीनां नामानि उल्लेखनीयानि सन्ति।

यावत् उत्तराखण्ड-वेद-धर्मशास्त्रवैभवस्य प्रश्नः वर्तते पं. परमेश्वरानन्दशास्त्री, डा. रामप्रसाद-उपाध्यायः, डा. कृष्णकुमारशर्मादीनां योगदानम् अत्र अविस्मरणीयं वर्तते। अनेन एव प्रकारेण व्याकरणविद्यायां परमेश्वरानन्दशास्त्री, चक्रधरहंसनौटियालः, आचार्यः वामदेवविद्यार्थी, शशिधरशर्मा बाबुलकरः चेत्यादयः स्मरणीयाः सन्ति। ज्योतिषशास्त्रे महीधरडङ्गवालधर्माधिकारिवर्यैः गढवालीपञ्चाङ्गस्य प्रकाशनं प्रारब्धम्। तैः बृहज्जातकेन सार्धमेव योगशास्त्रस्य गोरक्षपतेः टीका अपि लिखिता वर्तते। एवमेव मुकुन्ददैवज्ञेन (१८८७) ज्योतिषतत्त्वम् - ज्योतिषशब्दकोषादयः नैके ज्योतिषग्रन्थाः लिखिताः सन्ति। केशवानन्दडबराल-तुलारामबहुगुणादिभिः अपि बहवः ज्योतिषग्रन्थाः लिखिताः। अस्मिन् प्रसङ्गे चक्रधरजोशिवर्यस्य गदावली अपि उल्लेखनीया वर्तते।

वस्तुतः उत्तराखण्डस्य आचार्याणां विदुषां च सूची दीर्घा वर्तते। अत्र स्थालीपुलाकन्यायेन केषाञ्चिद् विदुषां नामानि उल्लिखितानि सन्ति। एतेषां समेषामपि विदुषां संस्कृतसाहित्यविषये यद् विपुलं योगदानं वर्तते तद्विषये चर्चा अत्यन्तम् आवश्यकी वर्तते। अद्य पर्यन्तम् अस्मिन् विषये काऽपि सङ्गोष्ठी न क्वापि आयोजिता, येन संस्कृतजगति एतेषां साहित्यस्य वास्तविकं मूल्याङ्कनं कर्तुं शक्येत। अतः अस्याः त्रिदिवसीयायाः सङ्गोष्ठ्याः महत्त्वम् औचित्यञ्च उभयमपि अस्ति।

## समारप्स्यन्ते परिसरपत्रिकाः

२३.०९.२०१६ तमे दिनाङ्के प्रो. बनमालीबिश्वालप्रमुखपत्रिकाप्रकाशनसमित्याः प्रथमे उपवेशने समुपस्थितसदस्यैः परिसरे तिसृणां पत्रिकाणां प्रकाशनार्थं प्रस्तावं निर्माय प्राचार्यमहोदयं प्रति अनुमोदनार्थं प्रेषितः। तत्र च "देवभूमिसौरभम्" इत्यस्याम् अन्ताराष्ट्रियवार्षिकशोधपत्रिकायां भारतीयानां वैदेशिकानाञ्च समेषां विदुषाम् उत्कृष्टा शोधलेखाः प्रकाशयिष्यन्ते। "संस्कृतगङ्गा" इत्यस्यां परिसरस्य वार्षिकशोधपत्रिकायाम् अत्रत्यानां विदुषां प्राध्यापकानां तथा च शोधच्छात्राणां शोध-लेखाः प्रकाशयिष्यन्ते। परिसरस्य त्रैमासिकवार्तापत्रिकारूपेण "रघुनाथवार्तावली" इति पत्रिका अपि प्रकाशिता भविष्यति। अस्यां पत्रिकायां परिसरस्य विविध-कार्यक्रमाः, प्राध्यापकानां छात्राणां च उपलब्धयः, सर्जनात्मक-कार्यकलापाः च प्रकाशिताः भविष्यन्ति।

०१.१२.२०१६ तमे दिनाङ्के परिसरप्राचार्यस्य प्रो. के.बी. सुब्बरायुडुमहोदयस्याध्यक्ष्ये प्रो. बनमालीबिश्वालस्य संयोजनायां च सम्पन्ने परिसरपत्रिकासमितेः द्वितीये उपवेशने एकस्याः वार्षिकपत्रिकायाः प्रकाशनस्य प्रस्तावः उपस्थापितो वर्तते। उपवेशने सर्वसम्मत्या परिसरेण "रघुनाथकीर्तिपताका"-नाम्नी वार्षिकी पत्रिका प्रकाशयिष्यते इति निर्णयो: जातः। परिसरीयाः प्राध्यापकाः परिसरे शोधरताः छात्रा सर्वे च छात्राः अस्यां पत्रिकायां स्वीयानि शोधपत्राणि प्रकाशयितुमर्हन्ति।

पत्रिकाशः सम्पादकमण्डलानां निर्माणमपि उपर्युक्तयोः उपवेशनयोः सञ्जातम्। उपर्युक्तानां तत्तत्पत्रिकाणां तत्तत्सम्पादकानाञ्च विवरणम् इत्थं वर्तते–

१. **देवभूमिसौरभम्** (अन्ताराष्ट्रिया वार्षिकी शोधपत्रिका)–इयं पत्रिका शोधलेखप्रकाशनाय समर्पिता वर्तते। अस्यां पत्रिकायाम् अन्ताराष्ट्रियस्तरे भारतीय-प्राच्यविद्याक्षेत्रे कृतभूरिश्रमाणां विदुषां गभीराः विद्वत्तापूर्णाश्च लेखाः प्रकाशयिष्यन्ते। एतस्याः शोधपत्रिकायाः सम्पादकमण्डलमित्थं वर्तते–प्रो. बनमाली बिश्वालः, डा. प्रफुल्लगडपालः तथा डा. मुकेशकुमारश्च।

२. **संस्कृतगङ्गा** (परिसरीया वार्षिकी शोधपत्रिका)–परिसरेण परिसरस्तरे "संस्कृतगङ्गा"-नाम्नी वार्षिकी शोधपत्रिका प्रकाशयिष्यते। अस्यां शोधपत्रिकायां परिसरीयाणां प्राध्यापकानां, शोधच्छात्राणां च शोधलेखाः प्रकाशयिष्यन्ते। एतस्याः शोधपत्रिकायाः सम्पादकमण्डलमित्थं वर्तते–डा. आर. बालमुरुगन्, डा. सुशीलप्रसादः, डा. अरविन्दगौरः तथा डा. शैलेन्द्रप्रसादउनियालश्च।

३. **रघुनाथकीर्तिपताका** (परिसरीया वार्षिकी पत्रिका)–परिसरीयाणां वार्षिकाणां क्रियाकलापानां विवरणम् उपस्थापयितुं परिसरेण इयं "रघुनाथकीर्तिपताका" इति वार्षिकी पत्रिका प्रकाशयिष्यते। अस्यां पत्रिकायां परिसरीयगतिविधिभिस्सह प्राध्यापकानां छात्राणां च साहित्यिकरचनाः अपि प्राकाश्यं गमिष्यन्ति। इत्थमत्र परिसरस्य वार्षिकगतिविधयः, अभिनवाः योजना-परियोजनाः, प्राध्यापकछात्राणां साहित्यिकरचनाः चेत्यादयो विषयाः प्रकाशयिष्यन्ते। अस्याः पत्रिकायाः सम्पादकमण्डलम् अनेन प्रकारेण वर्तते–डा. सुरेशशर्मा, डा. वीरेन्द्रबर्त्वालः, डा. निपुणचौधरी, श्रीपङ्कजकोटियालः तथा श्रीसन्दीपसिंहरावतश्च।

४. **रघुनाथवार्तावली** (परिसरीया त्रैमासिकी वार्तापत्रिका)–त्रैमासिक्यामस्यां पत्रिकायां परिसरस्य समस्तानां क्रियाकलापानां गतिविधिनां च विवरणं प्रदास्यते। इयं पत्रिका भागद्वये भविष्यति–प्रथमः खण्डः वार्ताखण्डः तथैव द्वितीयः खण्डः साहित्यखण्डः चेति। अस्याः पत्रिकायाः सम्पादकमण्डलम् एवंप्रकारेण वर्तते–डा. शैलेन्द्रनारायणकोटियालः, श्रीश्रीओमशर्मा, डा. मनीषजुगराणश्च। अत्र च परामर्शमण्डले प्रो. बनमाली बिश्वालः तथा डा. प्रफुल्लगडपालः च वर्तेते।

एतासां सर्वासां पत्रिकाणां प्रधानसम्पादकः भवति परिसरस्य प्राचार्यः प्रो. के.बी. सुब्बरायुडुमहोदयः।

## समायोजिता ज्योतिषविभागे विशिष्टव्याख्यानमाला

सुरभारत्याम् उपनिबद्धानां समेषामपि शास्त्राणां संरक्षणाय प्रसाराय च पुण्यायामस्यां देवभूमौ विद्यमाने अस्मिन् परिसरे काले-काले छात्राणां विविधशास्त्रीयज्ञानपिपासायाः शमनाय विशिष्टाः विद्वांसः शास्त्रेषु निगूढतत्त्वानि व्याख्यातुम् आहूयन्ते। अस्मिन् क्रमे २१.१०.२०१६ तमे दिनाङ्के ज्योतिषशास्त्रीयविशिष्टव्याख्यानस्य आयोजनम् अभूत्। एतदर्थं राष्ट्रियसंस्कृतसंस्थानस्य लखनऊपरिसरस्य ज्योतिषविभागस्य विद्वान् डा. उमेशमिश्रमहाभागः सम्प्राप्तः आसीत्। अयं महाभागः "राजयोगाः" इति विषयमधिकृत्य व्याख्यानम् अकरोत्। कार्यक्रमस्य अस्य आध्यक्ष्यं निरवहत् परिसरप्राचार्यः प्रो. के.बी. सुब्बरायुडुवर्यः। स्वागतभाषणं कुर्वन् साहित्यविभागप्राध्यापकः डा. शैलेन्द्रनारायणकोटियालः अस्य गढवालक्षेत्रस्य समृद्धज्योतिषशास्त्रीयपरम्पराविषये सर्वान् अबोधयत्। अस्मिन्नवसरे परिसरस्य समेऽपि प्राध्यापकाः छात्राश्च अत्र सोत्साहं भागम् अगृह्णन्। व्याख्यानानन्तरं सर्वैः जिज्ञासुभिः श्रोतृभिः कृतानां विविधप्रश्नानां समाधानमपि विहितम् व्याख्यात्रा। राङ्कवस्मृतिचिह्नादिभिः अभ्यागतानां सम्माननं विधाय अन्ते स्वीये अध्यक्षीयभाषणे परिसरप्राचार्यः प्रो. के.बी. सुब्बरायुडुवर्यः ज्योतिषशास्त्रीयाणां मुहूर्तादिविविधगम्भीरविचाराणाम् आधुनिककाले महत्तां प्राकटयत्। कार्यक्रमस्य सञ्चालनं ज्योतिषविभागप्राध्यापकः डा. मुकेशकुमारः अकरोत्।

# श्रीरघुनाथकीर्तिपरिसरस्य निर्माणार्थं भूमिपूजनं समनुष्ठितम्

देवभूमेः उत्तराखण्डस्य देवप्रयागतीर्थे १२.११.२०१६ तमे दिनाङ्के नवोद्घाटितस्य राष्ट्रियसंस्कृतसंस्थानस्य श्रीरघुनाथकीर्तिपरिसरस्य निर्माणकार्यं भूमिपूजनपुरस्सरं महता समारोहेण समारब्धम्। शुभावसरेऽस्मिन् परिसरस्य सर्वे प्राध्यापकाः छात्राः कर्मचारिणश्च सोत्साहं भागं गृहीतवन्तः। अस्मिन् समारोहे प्रातःकालादेव भगवतः श्रीरघुनाथस्य गङ्गायाश्च यथाविधि समाराधनं तथा च श्रीविश्वेशस्यार्चनादिकं सर्वैः मिलित्वा सम्पादितम्। अनन्तरं परिसरस्य विशालक्रीडाङ्गणे स्वस्त्ययनपूर्वकं साङ्गोपाङ्गार्चनं प्रवृत्तम्। माङ्गलिकवाद्यैः, तोरणध्वजादिभिः वेदमन्त्रैश्च सार्द्धं पुष्कलाभिः जयघोषैश्च नितरां मोदमयः सञ्जातोऽयं परिसरः। अस्य कार्यक्रमस्य चारुत्वं तदङ्गभूताभिः यज्ञाहुतिभिः सातिशयं वर्धितम्। वेदविभागस्य सहायकाचार्येण डा. शैलेन्द्रप्रसादउनियालेन विधिपूर्वकं सर्वमिदं पूजनकार्यं सम्पादितम्।




यज्ञविधानं कुर्वन्तः कुलपतिप्रमुखाः परिसरसदस्याः अन्ये च


शुभारम्भेऽस्मिन् राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः प्रो. परमेश्वरनारायणशास्त्री मुख्यातिथिरूपेण सम्मिलितोऽभूत्। कुलपतिः आदितः सम्पूर्त्तिपर्यन्तम् अस्मिन्नायोजने परिसरपरिवारेण सह मनोयोगपुरस्सरं भागं गृहीतवान्। स्वकीयोद्बोधने कुलपतिवर्यः उक्तवान् यत् 'एषः परिसरः उत्तराखण्डस्य अलकनन्दा-भागीरथ्योः सङ्गमे देवप्रयागनगरे तृतीयां सारस्वतधारां (त्रिवेणीरूपां) प्रवाहयिष्यति। अस्य परिसरस्य ज्ञानालोकेन न केवलम् उत्तराखण्डप्रदेशः, अपितु समग्रभारतवर्षं प्रकाशितं भविष्यति। न केवलमेतदेव किन्तु वैदेशिकाश्चाऽपि अनेन धन्या भविष्यन्तीति कामये।' कार्यक्रमस्य आध्यक्ष्यं परिसरस्य प्राचार्यः प्रो. के.बी. सुब्बरायुडुः निरवहत्। परिसरप्राचार्यः अवसरेऽस्मिन् कथितवान् यत् 'अस्माभिः सर्वैः मिलित्वा परिसरस्यास्य उत्थानाय अहर्निशं प्रयतितव्यम्। अचिरादेव परिसरस्य अपेक्षितं भवनादिनिर्माणं भविष्यतीति विषयेऽस्मिन् कुलपतिमहोदयः अस्माभिः सह सततैव कार्यरतो वर्तते।' देवप्रयागनगरस्य पञ्चायत-अध्यक्षा श्रीमती शुभाङ्गी कोटियालमहोदया अपि अत्र भागं गृहीत्वा स्वकीयां मङ्गलकामनां प्रस्तुतवती। अन्येऽपि मान्याः पौरजनाः कार्यक्रमेऽस्मिन् समुपस्थिताः। एतेषु श्रीबदरीशपण्डापञ्चायताध्यक्षः श्रीकृष्णकान्तकोटियालः, केन्द्रीयलोकनिर्माणविभागस्य कनिष्ठअभियन्ता श्रीआनन्दसिंहभण्डारी च प्रमुखाः आसन्। परिसरस्य न्यायविभागाचार्यः डा. आर. बालमुरुगन, साहित्यविभागाचार्यः डा. प्रफुल्लगडपालः, डा. शैलेन्द्रनाराणकोटियालः, डा. सुशीलप्रसादः, डा. मनीषजुगरानः, ज्योतिषविभागस्य डा. मुकेशकुमारशर्मा, डा. सुरेशशर्मा, कार्यालयीयकर्मचारिणः श्री एस.एन. नौटियालः, श्रीमती पल्लवी, श्रीअनूपकुमारः, श्रीद्वारिकाप्रसादः, श्रीपङ्कजजोशी, श्रीनवीनसिंहः, श्रीअनूपभट्टादयोऽपि अत्र भागं गृहीतवन्तः। मिष्टान्नवितरणपुरस्सरं कार्यक्रमस्य सम्पूर्त्तिः सञ्जाता।



पञ्चाङ्गपूजनावसरस्य किञ्चन दृश्यम्



शिलान्यासस्य किञ्चन दृश्यम्



कार्यक्रमावसरे भाषमाणः प्राचार्यः प्रो. के.बी. सुब्बरायुडुः

# अन्ताराष्ट्रिययोगदिवसः आयोजितः

२१.०६.२०१६ तमे दिनाङ्के अन्ताराष्ट्रिय-योगदिवसे श्रीरघुनाथकीर्तिपरिसरे योगकार्यक्रमः आयोजितोऽभूत्। अस्य आध्यक्ष्यं डा. शैलेन्द्रनारायणकोटियालमहोदयः निरूढवान्। मुख्यातिथित्वेन पूर्वग्रामप्रधानखेडा श्री-उत्तमसिंहः, विशिष्टातिथिरूपेण नगरपंचायतसदस्या श्रीमती रुक्मणीदेवी च उपस्थितौ आस्ताम्।


अस्मिन्नवसरे सर्वे छात्राः योगासनं प्रदर्शितवन्तः। परिसरच्छात्रः सर्वेशसयाना २२ योगासनानां प्रदर्शनं कृतवान् तथा च तद्विषये सर्वोपयोगिविज्ञानसमन्वितं सम्भाषणम् अकरोत्। छात्रः अमितप्रकाशबन्दोलिया अपि योगासनप्रदर्शनं नैपुण्येन अकरोत्। अस्मिन्नुपक्रमे ज्योतिषविभागस्य डा. अशोकथपलियालः, साहित्यविभागस्य डा. सुशीलप्रसादश्चापि छात्रान् सम्बोधितवन्तौ। परिसरस्य कर्मचारिणः श्री एस. एन. नौटियालः, श्रीमती पल्लवीबन्दोलिया, श्री अनूपकुमार इत्यादयोऽपि कार्यक्रमे समुपस्थिताः आसन्।

## हिन्दीपाक्षिकोत्सवः सम्पन्नः



उद्घाटनकार्यक्रमे भाषमाणः डा. एस. एन. कोटियाल

राष्ट्रभाषायाः हिन्द्याः प्रचारप्रसारार्थं श्रीरघुनाथकीर्तिपरिसरे पञ्चदशदिनात्मकः हिन्दीपाक्षिकोत्सवः समायोजितोऽभवत्। १४.०९.२०१६ तः २८.०९.२०१६ पर्यन्तं सञ्चालितेऽस्मिन् कार्यक्रमे विविधप्रतियोगितासु परिसरस्य छात्राः, प्राध्यापकाः, कर्मचारिणश्च सोत्साहं सहर्षञ्च भागमगृह्णन्। १४.०९.२०१६ तमे दिनाङ्के अस्य पाक्षिकोत्सवस्य शुभारम्भकार्यक्रमे देवप्रयागस्थस्य राजकीय-इण्टर-कालेज-विद्यालयस्य प्रधानाचार्यः श्रीअरुणकुमारसिन्हा मुख्यातिथित्वेन, देवप्रयागस्थ-भारतीय-स्टेटबैङ्कशाखायाः प्रबन्धकः श्रीअशोककुमारसूर्या विशिष्टातिथित्वेन, परिसरस्य प्राचार्यः प्रो. के.बी. सुब्बरायुडुमहोदयश्च अध्यक्षत्वेन उपस्थिताः आसन्। मञ्चासीनैः विद्वद्भिः हिन्दीभाषायाः साम्प्रतिकमहत्त्वं प्रतिपादितम्।



स्पर्धायां भाषमाणः डा. सुशीलप्रसादः



कार्यक्रमे स्वागतभाषणं प्रस्तुवन् प्रो. वनमालीबिश्वालः

पाक्षिकोत्सवेऽस्मिन् २१.०९.२०१६ तमे दिनाङ्के छात्राणां कृते निबन्धलेखन-वादविवाद-स्वरचितकवितापाठस्पर्धाः समायोजिताः। प्राध्यापकाश्च छात्राणां ज्ञानवर्धनाय यथावसरं सम्बद्धविषयेषु मार्गदर्शनं कृतवन्तः। २२.०९.२०१६ तमे दिनाङ्के विद्वांसः प्राध्यापकाः अपि राष्ट्रभाषामधिकृत्य विशदं न्यरूपयन्। २३.०९.२०१६ तमे दिनाङ्के परिसरस्य कर्मचारिणः स्पर्धासु सम्मिलिताः अभवन्। शुद्धलेखन-निबन्धलेखन-"नोटिंग एण्ड ड्राफ्टिंग"-स्पर्धाः कर्मचारिणां कृते उत्साहवर्धिन्यः सञ्जाताः।



समापनसमारोहावसरस्य सामूहिकं किञ्चन दृश्यम्



कार्यक्रमे मुख्यातिथिभाषणं प्रस्तुवन् प्रो. पीयूषकान्तदीक्षितः

अस्योत्सवस्य सम्पन्नतासत्रे मुख्यातिथिरूपेण उत्तराखण्डसंस्कृतविश्वविद्यालयस्य कुलपतिः प्रो. पीयूषकान्तदीक्षितः हिन्दीभाषायाः उद्भवप्रसङ्गे सप्रमाणं स्वाभिप्रायं प्रास्तौत्। स्वीयभाषणे सः नवोदितस्य श्रीरघुनाथकीर्तिपरिसरस्य उत्तरोत्तरमुत्कर्षं संवीक्ष्य आह्लादितः सन् अस्योन्नत्यै भगवन्तं जानकीजानिम् आराधितवान्। प्राचार्यस्य प्रो. सुब्बरायुडुमहोदयस्य सत्प्रयासं कार्यनैपुण्यं च सः मुक्तकण्ठेन प्रास्तौत्। विशिष्टातिथित्वेन विभागस्य सहायकाभियन्ता श्रीआनन्दसिंहभण्डारी अस्य राष्ट्रभाषोत्सवकार्यक्रमस्य भूरिशः प्रशंसाम् अकरोत् तथा अस्मिन् पुण्यमये कार्यक्रमे सम्प्राप्य स्वात्मानं धन्यम् अमन्यत। अस्मिन् सम्पूर्तिसत्रे वैदिकप्रार्थनां डा. शैलेन्द्रप्रसादउनियालः, स्वागतभाषणं प्रो. बनमालीबिश्वालः, धन्यवादज्ञापनं डा. आर. बालमुरुगन् तथा सञ्चालनं च डा. मनीषजुगरानः इतीमे परिसरीयाः प्राध्यापकाः कृतवन्तः। अस्य कार्यक्रमस्य संयोजकेन डा. शैलेन्द्रनारायणकोटियालेन सविस्तरं प्रास्ताविकं व्याहृतम्। राष्ट्रगानेन कार्यक्रमोऽयं सम्पन्नतामगात्।

### हिन्दीपाक्षिक-स्पर्धानां परिणामः

| | प्रथमः | द्वितीयः | तृतीयः |
|---|---|---|---|
| **निबन्धलेखनम्** | | | |
| | मनीषगौडः | नीरजनौटियालः | भुवनेशभट्टः |
| **वाद-विवादः** | | | |
| | भुवनेशभट्टः | अनुरूद्धत्रिपाठी | सूरजभट्टः |
| **स्वरचितकाव्यपाठः** | | | |
| | धनेशकोटियालः | भुवनेशभट्टः | अनुरूद्धकुमारत्रिपाठी |
| **शुद्धलेखनम्** | | | |
| | द्वारिकाप्रसादः | अनूपकुमारः | नवीनसिंहकोटियालः |
| **निबन्धलेखनम्** | | | |
| | द्वारिकाप्रसादः | पङ्कजजोशी | नवीनसिंहकोटियालः |
| **नोटिङ्ग एण्ड ड्राफ्टिङ्ग** | | | |
| | द्वारिकाप्रसादः | पल्लवीबन्दोलिया | पङ्कजजोशी |




पुरस्कारवितरणस्य कानिचन दृश्यानि

## संस्कृतस्पर्धासु विजेतारः ( परिणामः )

| स्पर्धा | प्रथमः | द्वितीयः | तृतीयः |
| --- | --- | --- | --- |
| संस्कृतभाषणस्पर्धा ( प्राक्शास्त्री/उत्तरमध्यमा ) | मनीषनौटियालः | ऋषिता तिवाडी | नवीनकैरवानः |
| संस्कृतभाषणस्पर्धा ( शास्त्री/ आचार्यः ) | अनुरुद्धकुमारत्रिपाठी | श्यामदेवः | नीरजनौटियालः |
| सुभाषितकण्ठपाठस्पर्धा ( कक्षा ६-८ ) | श्रीयांशूध्यानी | ऋषभखण्डूरी | मोनिकानौगांई |
| सुभाषितकण्ठपाठस्पर्धा ( कक्षा ९ - १२ ) | प्रियांशुध्यानी | मनीषनौटियालः | दीपकसिंहः |
| सुभाषितकण्ठपाठस्पर्धा ( कक्षा शास्त्री/आचार्यः ) | मनीषपन्तः | श्यामदेवः | अभिलाषकुकरेती |
| संस्कृतसमूहगानस्पर्धा ( सर्ववर्गीयाः छात्राः ) | प्रियांशुगणः | अभिलाषगणः | मनीषगणः |
| निबन्धलेखनस्पर्धा ( कक्षा ६-१० ) | वैष्णवी ध्यानी | सक्षमकोटियालः | नरेशध्यानी |
| निबन्धलेखनस्पर्धा ( कक्षा ११-१२ ) | नवीनकैरवानः | मनीषनौटियालः | शुभम् भट्टः |
| निबन्धलेखनस्पर्धा ( कक्षा शास्त्री आचार्यः ) | नीरजनौटियालः | उत्तमभट्टः | अभिलाषकुकरेती |

## समायोजितः स्वातन्त्र्यदिवसोत्सवः


ध्वजवन्दनस्यावसरस्य किञ्चन दृश्यम्


सांस्कृतिककार्यक्रमस्य किञ्चन दृश्यम्


कार्यक्रमं प्रेक्ष्यमाणाः छात्राः

देवप्रयागस्थ-श्रीरघुनाथकीर्तिपरिसरेण ऐषमः १५.०८.२०१६ तमे दिनाङ्के स्वतन्त्रतादिवससमारोहः आयोजितः। प्रातःकाले एव प्राचार्यप्रमुखाः परिसरसदस्याः छात्राश्च क्रीडाङ्गणे समुपस्थाय सोत्साहं स्वतन्त्रतादिवसस्य शुभकामनाः व्यतरन्। अवसरेऽस्मिन् परिसरप्राचार्येण ध्वजारोहणं तद्वन्दनं च विहितम्। ततश्च सर्वैरपि ध्वजवन्दनं कृतम्। राष्ट्रगानानन्तरं प्राचार्येण स्वीयमभिभाषणं प्रदत्तम्।

ततश्च छात्रैः अध्यापकैश्च सांस्कृतिकः कार्यक्रमः आयोजितः। अवसरेऽस्मिन् छात्राः स्वतन्त्रतादिवसमुपलक्ष्य विविधाः कविताः, गीतानि भाषणानि च प्रास्तुवन्। परिसरप्राचार्येण प्रो. के.बी. सुब्बरायुडुवर्येण स्वतन्त्रतायाः महत्त्वमत्र प्रकटितम्। तैः जीवनसाफल्याय च कर्त्तव्यानि दायित्वानि उपस्थापितानि। डा. आर. बालमुरूगन्, डा. प्रफुल्लगडपालः, डा. एस. एन. कोटियालः, डा. मनीषजुगरानः, डा. मुकेशकुमारः प्रभृतयोऽध्यापकाः स्वाभिप्रायमत्र प्राकटयन्। राष्ट्रगानेन मिष्टान्नवितरणेन च कार्यक्रमोऽयं सम्पन्नतामगात्।


स्वातन्त्र्यदिवसमुपलक्ष्य भाषमाणः प्राचार्यः



श्रीमत्यै कोटियालशुभाङ्ग्यै स्मृतिचिह्नं समर्पयन् डा. आर. बालमुरुगन्

## समनुष्ठितः संस्कृतसप्ताहमहोत्सवः

राष्ट्रियसंस्कृतसंस्थानस्य देवप्रयागस्थेन श्रीरघुनाथकीर्तिपरिसरेण ऐषमः १८.०८.२०१६ तः २४.०८.२०१६ इत्यवधौ सोत्साहं संस्कृतसप्ताहमहोत्सवः समनुष्ठितः। अस्य महोत्सवस्य अङ्गतया नैके कार्यक्रमाः समायोजिताः। संस्कृतसप्ताहमहोत्सवस्य उद्घाटनकार्यक्रमः १८.०८.२०१६ तमे दिनाङ्के सञ्जातः। उद्घाटनकार्यक्रमे मुख्यातिथित्वेन देवप्रयागस्य नगरपञ्चायताध्यक्षा श्रीमती शुभाङ्गी कोटियालः तथा विशिष्टातिथित्वेन श्रीरघुनाथकीर्ति-आदर्शसंस्कृतमहाविद्यालयस्य प्रबन्धनसमितेः प्रबन्धकः श्रीकृष्णकान्तकोटियालः च उपस्थितौ आस्ताम्। उद्घाटनकार्यक्रमेऽस्मिन् परिसरस्य न्यायविभागाध्यक्षः डा. आर. बालमुरुगन् आध्यक्ष्यम् आवहत्। वैदिक-लौकिकमङ्गलाचरण-सरस्वतीसमर्चनादिभिः कार्यक्रमस्य आरम्भः सञ्जातः। संस्कृतसप्ताहमहोत्सवस्य संयोजकेन डा. प्रफुल्लगडपालेन अत्र प्रास्ताविकं भाषणं कृतम् तथा महोत्सवस्यास्य संक्षिप्ता रूपरेखा च उपस्थापिता। ततश्च श्रीमती शुभाङ्गीकोटियालवर्या अत्र संस्कृतप्रचारस्य आवश्यकतां प्रतिपादयन्ती संस्कृते विद्यमानाः सम्भावनाश्चापि प्रत्यपादयत्। कार्यक्रमेऽस्मिन् विशिष्टातिथिपदं निर्वहता श्रीकृष्णकान्तकोटियालेन उत्तराखण्डे अस्य परिसरस्य भूमिका विशदं वर्णिता। डा. आर. बालमुरुगनः स्वीये अध्यक्षभाषणे एतादृशानां कार्यक्रमाणां महत्त्वं प्रतिपादयन् संस्कृतसप्ताहोत्सवस्य ऐतिह्यं महत्त्वं च प्राकटयत्। कार्यक्रमस्यान्ते डा. मनीषजुगरानः धन्यवादज्ञापनम् अकरोत्। मञ्चसञ्चालनं डा. मुकेशकुमारः अकरोत्।




शोभायात्रायाः किञ्चन दृश्यम्

संस्कृतसप्ताहमहोत्सवस्य द्वितीये दिने ०९.०८.२०१६ तमे दिनाङ्के छात्रैः विविधाः सांस्कृतिकाः कार्यक्रमाः आयोजिताः। २२.०८.२०१६ तमे दिनाङ्के छात्राणां कृते संस्कृतभाषणस्पर्धा, सुभाषितकण्ठपाठस्पर्धा च आयोजिते अभवताम्। एतयोः स्पर्धयोः देवप्रयागस्य समीपवर्तिभ्यः विद्यालयेभ्यः छात्राः अपि भागमगृह्णन्। एवमेव २३.०८.२०१६ तमे दिनाङ्के संस्कृतसमूहगानस्पर्धा, निबन्धलेखनस्पर्धा च आयोजिते। अत्रापि परिसरच्छात्राः अन्यविद्यालयच्छात्राः च अहमहमिकया भागमगृह्णन्।




श्रीमते आर.सी. शर्मणे स्मृतिचिह्नं समर्पयन्तौ प्रो. के.बी. सुब्बरायुडुः प्रो. वनमालीबिश्वालश्च



श्रीआनन्दसिंहभण्डारिणः स्वागतं व्याहरन् डा. प्रफुल्लगडपालः

२४.०८.२०१६ तमे दिनाङ्के सम्पूर्तिसमारोहावसरे देवप्रयागनगरे भव्या संस्कृतशोभायात्रा आयोजिता। छात्रैः शोभायात्रायां संस्कृताध्ययनस्य सन्देशः प्रचारितः। सम्पूर्तिसमारोहे मुख्यातिथिरूपेण श्रीनगरस्थ-केन्द्रीयलोकनिर्माणविभागस्य गढवालकेन्द्रीयमण्डलस्य कार्यपालकाभियन्ता श्री आर.सी. शर्मा समुपस्थितः। श्रीआनन्दसिंहभण्डारी च विशिष्टातिथिरूपेण समुपस्थितः। कार्यक्रमस्य आध्यक्ष्यं परिसरप्राचार्येण प्रो. के.बी. सुब्बरायुडुमहोदयेन निर्व्यूढम्।

अत्र स्वागतभाषणं परिसरस्य व्याकरणविभागाध्यक्षेण प्रो. बनमालीबिश्वालमहोदयेन विहितम्। प्रास्ताविकं च साहित्यविभागाध्यक्षेन डा. प्रफुल्लगडपालेन उपस्थापितम्। मुख्यातिथिना श्रीशर्मणा संस्कृतस्य महत्त्वं प्रकटितम्, अथ च परिसरभवननिर्माणविषये स्वीया कल्पना उपस्थापिता। ततः संस्कृतसप्ताहमहोत्सवे आयोजितासु स्पर्धासु विजेतृभ्यः पुरस्कारवितरणकार्यक्रमः आयोजितोऽभूत्। कार्यक्रमस्यान्ते डा. अशोकथपलियालेन ज्योतिषविभागाध्यक्षेण अतिथिभ्यः कार्तज्ञ्यं ज्ञापितम्। ततश्च राष्ट्रगीतेन कार्यक्रमः सुसम्पन्नः। अस्य कार्यक्रमस्य सञ्चालनं डा. आर. बालमुरुगन् अकरोत्।

### पुरस्कारवितरणस्य कानिचन दृश्यानि









## श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः

नवदिल्लीस्थेन राष्ट्रिय-संस्कृत-संस्थानेन १६.०६.२०१६ तमे दिनाङ्के देवप्रयागस्थः श्रीरघुनाथ-कीर्ति-आदर्श-संस्कृत-महाविद्यालयः (स्था.१९०८) स्व-त्रयोदश-परिसररूपेण अधिगृहीतः। पूर्वतन-महाविद्यालयस्य धरायामस्यापि परिसरस्य नामकरणं द्वयोः पौराणिकनद्योः भागीरथ्यलकनन्दयोः दिव्य-सङ्गमस्थलस्य समीपवर्तिनिक्षेत्रे पर्वतीय-कत्यूरी-शैल्या निर्मिते प्राचीने श्रीरघुनाथमन्दिरे विद्यमानस्य प्रसिद्धदेवस्य श्रीरघुनाथस्य नाम्नैव स्वीकृतमस्ति। एतदेव स्थानं वास्तविकरूपेण गङ्गाया उद्गमस्थानमपि वर्तते।

यावत् परिसरस्य भौगोलिक-ऐतिहासिक-पौराणिक-शैक्षिक-स्थितेः प्रश्नः, देवप्रयागः उत्तराखण्डे (पूर्व-उत्तराञ्चले ततः पूर्वञ्च उत्तरप्रदेशे) विद्यमानोऽस्ति, यश्च सांस्कृतिक-दृष्ट्या देवभूमीति नाम्ना प्रसिद्धिप्राप्तः। अस्यां देवभूमौ न केवलं प्रसिद्धेषु ज्योतिर्मठेषु अन्यतमं श्रीबद्रिकाश्रम-धाम अवस्थितम्, अपितु द्वादश ज्योतिर्लिङ्गेषु प्रधानः श्रीकेदारनाथोऽप्यत्र विराजमानः। सहैव भारतीयसंस्कृतेरमूल्य-स्रोतस्विन्योः श्रीगङ्गायमुनयोः उद्गम-स्थानमप्ययमेव पावनः प्रदेशः। देवतात्मा हिमालयः अद्याप्यत्र पृथिव्या मानदण्डरूपिणीं गौरवमयीं गाथां स्वकीय-अमितप्रभया उद्भासयति।

पौराणिकमान्यतानुसारेण (स्कन्दपुराणस्य केदारखण्डानुसारेण) देवशर्म-नाम्नः तपस्विनः नाम्ना स्थानमिदं देवप्रयाग-नाम्ना ज्ञायते, येन तपस्विना कदाचिदत्र घोरतपस्या विहिता। उत्तराखण्डस्य पञ्च प्रयागेषु देवप्रयागः प्रथम-प्रयागत्वेन प्रसिद्ध्यति, यस्मात् परं रुद्रप्रयाग-कर्णप्रयाग-नन्दप्रयाग-विष्णुप्रयागाणां क्रमः प्रवर्तते। देवप्रयागस्य नगरीय-भूभागः तिसृभिः पर्वतमालाभिः परिवेष्टितः। भगवतः श्रीरघुनाथस्य मन्दिरवर्ती भूप्रदेशः गृद्धाचल-श्रेण्यामायाति, द्वितीयश्च भागीरथ्या दक्षिण-तटीयभागस्थ-दशरथाचल-शृङ्खलायां वर्तते। एवमेव तृतीयः अलकनन्दातटीयो भागः नृसिंहाचल-नाम्ना ज्ञायते। अत्रत्य-मान्यतानुसारेण प्राचीनसमयादेव देवप्रयागस्थः नृसिंहाचलः विद्या-क्षेत्रनाम्ना अभिहितः। एष एकमात्र-प्रदेशोऽस्ति उत्तराखण्डः, यत्र संस्कृतं प्रदेशस्य द्वितीयराजभाषात्वेन स्वीकृतम्।

एतस्यां सांस्कृतिक-आध्यात्मिक-शैक्षणिक-पृष्ठभूमौ १६.०६.२०१६ तमे दिनाङ्के परिसरस्यास्य उद्घाटनमुत्तराखण्डस्य माननीय-शिक्षामन्त्रिणा श्रीमन्त्रिप्रसादनैथानी-महोदयेन राष्ट्रियसंस्कृतसंस्थानस्य माननीयकुलपतेः आचार्यस्य पी.एन. शास्त्रिणः, पूर्वराज्यसभा-सदस्यस्य श्रीएम.के. ध्यानिनः तथा सूचना-आयुक्तस्य श्रीराजेन्द्रकोटियालस्य गरिमामय्यामुपस्थितौ कृतं वर्तते। पूर्वमेव गतिमता अत्रत्येन संस्कृतमहाविद्यालयेन परिसराय स्वकीय-परिसरस्य ३.४४३ हेक्टेयर-परिमिता भूमिः प्रदत्ता। एवमेव उत्तराखण्ड-सर्वकारेणापि परिसराय ९.२२८ हेक्टेयरपरिमिता (आहत्य २३ एकड-परिमिता) भूमिः प्रदत्ता। सा च भूमिः सम्बद्धपरिसरीयसमितेः परामर्शानन्तरमावश्यकप्रमुखशैक्षिकप्राशासनिकआवासीय-(बालक-बालिका-छात्रावास-कर्मचारीनिवास) भवनखण्डैर्युक्तस्य सम्पूर्ण-भवनस्य निर्माणार्थं केन्द्रीयलोकनिर्माणविभागस्य श्रीनगरशाखायै अन्तिमप्रारूपाय (ले-आउट) समर्पितोऽस्ति।

इदानीं नूतनतया प्रतिष्ठिते परिसरेऽस्मिन् पूर्वतनमहाविद्यालयेनैव प्रदत्ते सीमिते भवनखण्डे व्याकरण-साहित्य-ज्योतिष-वेद-न्यायेति-पञ्च-विभागेषु संस्थानेन प्रतिनियुक्तानां स्व-स्वशास्त्रनिष्णातानां पञ्चदश प्राध्यापकानां मार्गदर्शने प्राक्शास्त्रि- शास्त्रि-आचार्यकक्षासु प्रायः शतसङ्ख्याकैः छात्रैः इदानीं नियमितरूपेण शिक्षाग्रहणं प्रारब्धमस्ति। एतेभ्यः छात्रेभ्यः अत्र उपर्युक्त-पारम्परिकविषयैः समं स्नातक-समकक्षानां हिन्दी-अङ्ग्रेजी-इतिहास-सङ्गणकविज्ञान-(कम्प्यूटर-साइंस)-सदृशा-नामाधुनिक-विषयाणामौपचारिकं ज्ञानमपि प्रदीयते। संस्कृतशिक्षकान् प्रशिक्षितान् कर्तुमग्रिमे शिक्षावर्षे (२०१७-१८) अत्र शिक्षाशास्त्री-(बी.एड.)-पाठ्यक्रमः अपि प्रारप्स्यते। सहैवात्र शोध-पाठ्यक्रमं प्रारब्धुमपि योजना विधीयते, या विशिष्य विद्यावारिधि-(पीएच.डी.)-उपाधये उद्दिष्टोऽस्ति। साम्प्रतमत्र एका शोधपरियोजना (रिसर्च प्रोजेक्ट) प्रवर्तमाना अस्ति, या प्रगतिपथे प्रवर्तते। केचन स्थानान्तरिताः शोधच्छात्राः अप्यत्र कार्यरताः सन्ति। समये समये परिसरेऽस्मिन् प्रत्येकविभागपक्षतः राष्ट्रीयसङ्गोष्ठीनां, कार्यशालानां तथा च विशिष्टव्याख्याना-नामायोजनमपि क्रियते। संस्कृते सम्भाषणं प्रोत्साहयितुमनौपचारिकरूपेणात्र सम्भाषण- संस्कृत-कक्षाः अपि सञ्चाल्यन्ते। भविष्यत्काले परिसरे कञ्चन समृद्धं पुस्तकालयं (पुस्तक-हस्तलेखानां) प्रतिष्ठापयितुं योजना विधीयते। साम्प्रतञ्च पुस्तकालयेस्मिन् विविध-विषयकानि सहस्राधिकानि पुस्तकानि सङ्गृहीतानि सन्ति। अपरं च परिसरेऽस्मिन् चतसृणां महत्त्वपूर्णानां पत्रिकाणां प्रकाशनमपि प्रस्तावितं वर्तते। अस्मिन्नेव वर्षे एका अन्ताराष्ट्रिया वार्षिकी शोधपत्रिका "देवभूमिसौरभम्" इति नाम्ना, परिसरीयशोधपत्रिका "संस्कृतगङ्गा" इति नाम्ना, परिसरीया वार्षिकपत्रिका "रघुनाथकीर्तिपताका"-नाम्ना तथा परिसरीया त्रैमासिकी वार्ता-पत्रिका च "रघुनाथ-वार्तावली" इति नाम्ना प्रकाशयितुं योजना निर्मिता वर्तते, यस्य कार्यान्वयनमपि प्रारब्धमस्ति।

परिसरपरिचयः





# परिसरचित्रमालिका





Raghunathavartavali : Quarterly News Bulletin of Shri Raghunath Kirti Campus of Rashtriya Sanskrit Sansthan, Pub. by the Principal for Shri Raghunath Kirti Campus, Devprayag, Uttrakhand & Printed at D.V. Printers, 97-U.B. Jawahar Nagar, Delhi-110007